No. ४३३२

Title शास्त्रदीपिका तृतीयाध्याय: प्रभाव्याख्या

Author श्री वैद्यनाथ:

Extent ८१ Age १८६६

Subject पू. मीमांसाशा.

शास्त्रदीपिकाव्याख्या प्रभा तृतीयाध्यायः

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथातः शेषलक्षणम् ॥ ॥ सूत्रं व्याकुर्वन्नध्यायार्थमाह । एवमिति । भेद इति । स्मृतिसम
पादस्यानेन तत्पार्थता दर्शिता । अतः शब्दार्थमाह । भिन्नानामिति । लक्षणं व्युत्पादनं । शेषशेषिभावावच्छेदेन कर्म
भेदहेतुकत्वाभावेऽपि तत्सामानाधिकरण्येन कर्मभेदस्य हेतुत्वसंभवात्संगतमुपपत्तिरिमाह यद्यपीत्यादि । शेषत्वा
वच्छेदेनापि पूर्वाध्यायार्थस्य हेतुत्वं संभवतीति गुरुमते न कश्चिद्दूषणं कृतेन नु चेति । शास्त्रान्तरेति । अवघातशास्त्र
भिन्नेष्वर्थः । तावता कथं द्वितीयाध्यायार्थस्य हेतुता नाह शास्त्रभेदेति । अत्रैवं गुरुमतं । प्रथमाध्यायप्रतिपा
दितप्रामाण्यस्य शास्त्रस्यैव भेदः साध्यानुबन्धभेदाद्द्वितीये प्रतिपाद्यते । न कर्मभेदः । तस्य शास्त्रभेदफ
लत्वेनार्थसिद्धत्वात् । शास्त्रप्रामाण्यहेतुकश्च भेदः सामानाधिकरण्यात् शास्त्रस्यैतो विलोनकर्मणां । एकशा
स्त्रत्वे हि सर्वचोदनानामशक्यानुष्ठानार्थतया प्रामाण्यप्रसंगात् सिद्धप्रामाण्यबलेन शास्त्रभेदसिद्धिः । सा
ध्यानुबन्धभेदौ च तत्साधकौ । तत्र साध्यमुत्पत्तिप्राप्तिविकृतिसंस्कृतिकरणोपकारकरणावान्तरकापूर्वैश्च
र्वलक्षणाधिकारभेदस्सप्तविधः । तत्र निरपेक्षं विद्यमानं शास्त्रभेदहेतुः । यथा पुरोडाशं संयौतीत्यस्य पु
रोडाशोत्पत्तिशास्त्रस्य पुरोडाशं चतुर्धा करोतीति संस्कारशास्त्राद्भेदः । तन्निरपेक्षोत्पत्तिरूपसाध्यभेदात् । अग्ना

ग्नेयोष्टाकपाल इति शास्त्रात्स्वभेद एव: तत्सापेक्षपुरोडाशोत्पत्तितात्पर्यवत्त्वात्· एवं पयो दोग्धीति पय:प्राप्तिशा
स्त्रस्य पय:संस्कारशास्त्राद्भेद: अभेदश्चैंद्रं पय इत्याद्यागशास्त्रात्· तस्यासमिधो यजतीत्यादिनामितिकर्तव्य
ता शास्त्राणां करणोपकाररूपतिरपेक्षसाध्यभेदाद्दाग्नेयोष्टाकपाल इत्यादित: करणानां तदुपकार्यरूपे
ण्यस्य पूर्वरूपसाध्यविषयाद्भेद: अभेदश्च स्वर्गकाम इत्यधिकारशास्त्रात्· तत्सापेक्षत्वात्सकलेतिकर्तव्य
ता शास्त्राणाम् करणशास्त्राणां च· तथा स्वर्गकामयावज्जीवाधिकारशास्त्रयोर्निरपेक्षाधिकाररूपसाध्य
भेदाद्भेद इत्यूह्यम· एवमनुबंधत्वनियोगाख्यापूर्वविषयत्वे· तद्भेदश्च शब्दांतरादिप्रमाणषट्कापादि
त: षड्विध इति· तदेतदभ्युपेत्यप्रक्रांते त्वद्रीत्या शास्त्रभेदो नास्तीत्याह· किमिति· केन· प्रमाणेन· निरपे
क्षेति· अवघातशास्त्रस्य व्रीहिविकाररूपसाध्यविषयत्वात्तस्य च व्रीहिशास्त्रसापेक्षत्वादिति भाव:·
नापीति· व्रीहितदवघातशास्त्रयोर्द्व्यार्थत्वेन नियोगविषयरूपानुबंधभेदो नास्तीत्यर्थ:· न चावघात
शास्त्रस्य व्रीहिशास्त्रसापेक्षत्वेपि व्रीहिशास्त्रस्यावघातशास्त्रनिर[illegible]त्वान्नतो भेदोस्त्येवेत्याशंक्य शा
स्त्रभेदाभावस्य स्फुटमुदाहरणमाह· सोमेनेति· शास्त्रभेदव्यापकवाक्यभेदाभावे सुतरां शास्त्रभे

शा·दी·
२

दाभाव इत्यर्थः अत्रापि शास्त्रांतरविहितयागं प्रमेव सोमस्य शेषत्वेपि शंकते नन्विति अधिकारः फलं तत्संबद्धस्येत्यर्थः
सोमस्यैव सोमयागस्यैव विषयत्वेन कार्यरूपापूर्वविषयत्वेन निरपेक्षेति इमममपूर्वस्य परमापूर्वसिद्ध्यनंतरं कल्प्य
त्वेन तत्सापेक्षत्वादिति भावः निःसंदिग्धमुदाहरणांतरमाह इद्धि देति यागस्यैघनंतरं शेषत्वमित्यनुषंगः अतिस्पष्टं
शास्त्रभेदव्यभिचारस्थलमाह तथेति उपसंहरति तस्मादिति एवकारेणाद्व्यादिव्यवच्छेदः कर्मणां शेषत्वस्यैव शा
स्त्रभेदस्य हेतुत्वे स्यादिशंकामपाकरोति अत्रापीति कर्मणां शेषशेषित्वेपीत्यर्थः अवघातशास्त्रस्य प्रधानशास्त्रसा
पेक्षतया न शास्त्रभेद इति भावः न केवलं तदुक्तहेतुत्वाभावाच्छास्त्रभेदस्य न द्वितीयाध्यायप्रतिपाद्यत्वं अपितु
भाष्यग्रंथविरोधादपीति सूचयन्नेतस्मादिति अनुभाषणं अनुवादः कर्मपदस्य बोधकशास्त्रोपलक्षणमिति
५५ तन्मतं दूषयति नन्विति अत एव प्रकृतेपीति नेन भाष्यकारीयानुवादादेव सूत्रविरोधमप्याह सौत्रेणाचेति ननु
न्यायानुगुणापेग्रंथविरोधो न दूषणं ग्रंथस्य न्यायानुसारित्वादत आह अपुक्तं चेति अनुबंधांतरं यत्नतिदग्धता
साद्दौ यागरूपानुबंधादन्यद्ध्यानादिकं तदनुबद्धं तद्विषयकं नियोगांतरं कार्यांतरं मध्ये अनुबंधभेदका
र्यभेदयोर्मध्ये शास्त्रस्य शब्दरूपतया शास्त्राप्रतिपाद्यत्वादिति भावः किंच प्रधानभूताधिकारशास्त्रानुरूप
सापेक्षतया भिन्नेनांगशास्त्रेणास्तार्थोपि प्रधानशास्त्रार्थादभिन्न एव प्रतिपादनीय इत्यंगप्रधानकर्मणो २

भिन्नरूपेणावगतिर्नस्यादिमादिबहुदूषणाग्रस्तमेतन्मतमितिसूचयति। ज्ञातां तावदिति। शेषत्वनिरूपणोप
योगितयार्थादन्येषामपि प्रतिज्ञासूत्रविषयतां दर्शयति। त्रकिति। लक्षणां। व्युत्पादनं। वक्ष्यते। ज्ञानंदयादिवि
वत्। विनियोगइत्यस्य भाष्याद्युक्तस्य व्याख्यानं शेषस्येति॥ ॥शेषः परार्थत्वात्॥ ॥प्रतिज्ञातानां शेषरूपा
दीनां निरूपणे कर्त्तव्ये विनियोगप्रकारप्रमाणादीनां शेषस्वरूपज्ञानसापेक्षत्वात्तस्य च हेत्वंतरेणासंभवा
द्धेतुप्रदर्शनपूर्वकं शेषस्वरूपं प्रथमं निरूप्यत इत्याह। प्रथममिति। श्रुतिपदस्य घिसंज्ञत्वेन द्वंद्वे घीति पूर्वनिपा
तेप्यर्थक्रमेणाह तावच्चयः। तदाह। तत्रेति। अत्रया पंचमीविभक्त्या अर्थादिमेतद्विवृणोति। यद्याहीति। प्रयाजादि
यः शेषपदवाच्यः परार्थत्वादितिसूत्रवाक्यार्थेवगते परार्थत्वं शेषलक्षणमिति समर्थसिद्धमिमर्थः। अत्र भाष्यका
रेण लक्षणाहे सोस्तु इत्यपमाख्यायत इति ग्रंथेन सूत्रप्रतिपाद्यत्वमुक्त्वाग्रे स्वरूपप्रतिपादनमेव दर्शितं न हेतु
प्रतिपादनं तदभिप्रायमाह। भाष्येत्विति। अयमाशयः। प्राधान्येन प्रथमं को हि शेष इति शेषस्वरूपजिज्ञासे
ति तदेव साक्षात्प्रतिपादयितुमुचितं हेतूक्तस्वरूपज्ञानोत्तरं जिज्ञासितो भवतीति तस्यार्थतः प्रतिपादनमुचितं
एवं च यः परार्थः स शेष इति स्वरूपकथने सूत्रतात्पर्यमिति परार्थत्वादिति पंचमी प्रथमार्थे बोध्या। परार्थत्वं

शेषपदवाच्यमित्यर्थः परार्थत्वस्य शेषपदवाच्यत्वे चावगते तस्यैव शेषपदप्रवृत्तिनिमित्तत्वरूपहेतुत्वमर्थात्सिद्धमि
ति॥ ननु शेषत्वस्य लोकप्रसिद्धत्वात्किं तल्लक्षणेनेत्याशंक्याह अत्रैवेति· अविनाभावादव्यस्तलक्षणाभासादीति
३ विग्रहः तानेव दर्शयति केचिदित्यादिना अतिव्याप्तिमाह रूपेति तद्रूपतद्रसादीनामित्यर्थः एवं तदाग्नेयतद
ति४ ग्नीषोमीयादीनामिति तेपि प्रयोज्यत्वमिं अंगानां प्रधानप्रयुक्तत्वाद्यत्प्रयोज्यं यत्र तदंगमित्यर्थः दूषयति पुरोडा
शेति पुरोडाशकपालेन तुषानुपवतीति तुषोपवापे पुरोडाशार्थकपालस्यांगत्वबोधनात्तत्राव्याप्तिः कपालस्य
पुरोडाशप्रयोज्यत्वेन तुषोपवापाप्रयोज्यत्वस्य च तुर्ये वक्ष्यमाणत्वादिति भावः विधेयतेति प्रधानविधेयतेत्यर्थः
वि एवंध्यादावत्रापि तेपि शाखेति इषेत्वेति छिनत्तीति यद्यपि दोहनार्थवत्सापाकरणार्थं इषेत्वादिने शाखाछेद
नं विहितं तत्राव्याप्तिरित्यर्थः अन्ये बादरिमतानुसारिणः कुर्वन्तीति शत्रंतं प्रधानविशेषणं अनुष्ठानोपयोगं
अनुष्ठानसामर्थ्यरूपोपकारं परोपकारकत्वरूपस्य पारार्थ्यस्योक्तदोषत्वात्तन्निर्वक्ति परोद्देशेति प्रवृत्ति
श्चेयनंतरं शेषत्वाभिमतस्येति शेषः तथा च परोद्देश्यकप्रवृत्तिसंबंधित्वमित्यर्थः स्वभिन्नपदोद्देश्यकप्र
वृत्तिसंबंधित्वेन विधिबोध्यं यत्तत्तदंगमिति तन्निष्कर्षः यागादेः स्वर्गाद्युद्देश्यकप्रवृत्तिसंबंधित्वेन विधि राम ३

गम्यत्वात्स्वर्गाद्यंगत्वोपपत्तिः फलस्य स्वांगत्ववारणाय स्वभिन्नेति संबंधित्वं च कारकतया ज्ञेयं तेन निमि
त्तेन फलांगत्वापत्तिः द्रव्यगुणकर्तृकालदेशादौ तादृशप्रवृत्तौ करणत्वाधिकरणत्वादिना संबंधित्वेन वि
धेयत्वाल्लक्षणासमन्वयः निमित्तोद्देश्यकप्रवृत्तिसंबंधितया कर्मणो विधेयत्वेपि न निमित्तांगत्वापत्ति
ः ईप्सितत्वेन विलक्षणोद्देश्यतापारस्यैव लक्षणघटकत्वादिति अग्न्यादिलक्षणे अग्न्यादिप्रमाणकेऽभि
धानेन शास्त्र्या फलोद्देशप्रवृत्तता फलोद्देश्यकप्रवृत्तिसंबंधिता न चैवं सति फलस्यैवोद्देश्यतया तदुद्देश्य
कप्रवृत्तिसंबंधिनाप्रधानकर्मणामेव तदंगत्वं स्यान्न तु प्रयाजादीनां दर्शाद्यंगत्वमपि दर्शोद्देशोक्तित्वाभा
वेन तल्लक्षणोद्देश्यत्वाभावादित्याशंक्याह फलार्थत्वेति फले ... पाद्यपाहेतुत्वेनोपायस्योद्देश्यत्वम ५५
विकल्पमिति भावः ॥ ॥ द्रव्यगुणसंस्कारेषु बादरिः ॥ ॥ एतदधिकरणस्य पूर्वाधिकरणकोष्ठशेषनिकारूपत
पातच्छेषतामाह अत्रेति द्रव्यं व्रीह्यादि संस्कारोवघातादिः गुणोरुणादि अग्न्यादेः अर्तिनिगादिप्रमाणा
त् दर्शनात् प्रत्यक्षात् तत्र व्रीह्यादीनामुपकारकत्वं प्रत्यक्षादवगम्यते प्रोक्षणादिसंस्कारस्य तु द्वितीयाश्रुतिव
शेनाऽपि द्रव्यादीनामवशेषत्वे हेतुमाह उपकारकत्वमेवेति नत्विति तृतीयाद्वितीययोरभावादिति भावः नन्वपु

३
शा·दी
४

रुषार्थस्य यागस्य कथं विधिना कर्तव्यतावगमः स्यादत आह · तदेतदिति प्रेक्षावद्भिर्यागकरणेऽपि कृतिसा
ध्यत्वयोग्यतामात्रबोधनेन वाक्यप्रामाण्योपपत्तेस्तदभावेऽपि वा न क्षतिरिति तत्र पूर्वपक्षो वक्ष्यते इष्टार्थ
इष्टमेवेति · औदुंबरीसमानादिष्विति शेषः · एवमिति · फलस्यैव पुरुषस्यापि तत्संबंधित्वेनेच्छाविषयत
योद्देश्यत्वसत्वात् फलं मे भूयादित्याकारेच्छानुभवात् तथा च पुरुषोद्देश्यकप्रवृत्तिसंबंधितया विधि
गम्यत्वात्पुरुषशेषत्वमिष्टमिति भावः · कामवशात् फलं मे भूयादितीच्छास्वाभाव्यात् · एतदेव विवृणो
ति · नहीत्यादि · विधिवशादिति व्याचष्टे · विधिश्चेति · न केवलमर्थापत्त्या फलस्यात्मार्थतावगमः किंतु
शब्दतोऽपि यत आह · आत्मनेपदेति · आत्मगामिक्रियाफलेति द्योतनादिति भावः · ननु कर्तृत्वेन शेषभूतस्य
पुरुषस्य कथं शेषित्वमित्याशंक्य कर्तृत्ववद्भोक्तृत्वस्यापि संभवाद्रूपभेदेनाविरोध इत्याशयेनाह तत्त
श्चेति · अपि भिन्नक्रमः शेषत्वमप्यस्यार्थः · रूपभेदमभिप्रायमेव विवृणोति · आख्यातेनेति · तथा च का
मपदेन भोक्तृत्वमाख्यातेन च कर्तृत्वं प्रतिपादनाद्रूपभेद इति भावः · क्रमेणैवेति · पतमानसंमितेति शब्देन
पतमानेन संमितं मर्यादिकेनेत्यर्थः ॥ ॥तेषामर्थेन संबंधः॥ ॥सामान्यतोऽगांगित्वावगमे सति कथं शाम
७

मंगांगित्वमिममाकांक्षायां तन्निरूपणादनंतरसंगतिरित्याह इदानीमिति । इतआरभ्य पंचभिरधिक
रणैः पादद्वयेन च श्रौतविनियोगप्रकारविचारः प्राधान्येन प्रतिपाद्यार्थः अन्यप्रासंगिकामिति
तेयं धर्माः तन्नीमनंतरं प्रयोजकानीतिशेषः न च स्तु फलापूर्वमेवैकं तथापि व्रीह्यादिसंबंधित्वेन श्रुतानाम
मवघातादीनां कथमप्यादिसाधारण्यमत आह धर्माणामिति । एतदेवोपपादयति अवघातादीना
मिति । व्रीहिस्वरूपे तत्कार्यपुरोडाशादौ चावघातनियमतदृष्टानामनुपयोगादपूर्वीयस्तत्रोपयोग
इति व्रीहिपदेनापूर्वसाधनत्वं लक्षणया अवघातेनापूर्वसा[illegible]धनं भावयेदिति वाक्यार्थः अ
पूर्वं वैकमेवेति सर्वेषामप्यादीनां तत्साधनानामवघातोपयोगानामिव भवितुमर्हतीत्यर्थः नचापूर्वसंब
न्धविशिष्टव्रीहित्वमेवोद्देश्यतावच्छेदकमिति नान्यत्रावघातादिस्यादत आह न व्रीहीति । युगपद्द
त्रिद्वयविरोधादपूर्वसाधनत्वलक्षणोपस्थाराणां तथा च न व्रीहित्वस्योद्देश्यकोटिनिवेशः अन्यथा पर्वेषवघा
तानापत्तेरिति भावः अवांतरापूर्वीणामपूर्वाधिकरणोक्तरीत्या आवश्यकत्वात्तदभ्युपगमेनापि पूर्वपक्ष
माह संतु वेति । फलवद्धि फलोत्पत्त्यर्थमंगान्यपेक्षते नान्यदित्यर्थः वाङ्घ्रि प्रमेति । पावत्पादाचाकाम

३

शा॰ दी॰
५

पीतत्वमाद्यदीक्षणीयायामनुब्रूयादिति विहितः स्वरविशेषनियम इत्यर्थः सच प्रयाजादीक्षणीयायापूर्वार्थ
एवं न तु प्रधानीभूतस्योतिष्टोमापूर्वार्थ इति नवममेवक्ष्यते तथात्रापीति शंकार्थः नन्वेवमपूर्वद्वयस्याप्या
ग्नेयादिसंबंधाविशेषात्परमापूर्वसाधनत्वं नैव कुतो लक्ष्यत इति शंकायामाह प्रधानत्वाच्चेति ननु दर्श
णीयापूर्वस्य साक्षात्फलत्वेपि परंपराफलत्वं वा द्वर्मप्रयोगकत्वमुत्क्रममेव मध्यांतरापूर्वाणां म
हापि पूर्वत्वमित्याशंक्याह यद्यपि चेति सर्वेषां धर्माणां विशस्तरूणा आशुतरविनाशिनीति तैर्म
ध्यांतरापूर्वैः ननु प्रकृतोपयोगितयात्रैवावांतरापूर्वभेदसाधनमुचितं नापूर्वाधिकरण इत्याशंक्या
ह अंगानां चेति वक्ष्यमाणोपयोगाधिप्रायेणेत्यर्थः अवांतरापूर्वलक्षणायाबीजभूतं प्रत्यासत्ति
विशेषमाह साक्षादिति व्यवस्थाबीजमाह श्रुतेरिति व्रीह्यादिशब्दादित्यर्थः व्रीह्यादिशब्दो हि
स्वसाध्यकर्मापूर्वमेव लक्षयति नान्यदसंबंधादिति भावः तादृशापूर्वसाधनत्वं च प्रवेधयतीति तत्रा
प्यवघातायनुष्ठानक्रमः साधनत्वं चेह विः प्रकृतितया व्रीहीणामिति तादृशमेव व्रीहिपदेन लक्ष्य राम
ते तेन स्रुगादिषु नातिप्रसंग इति दिक् दृष्टार्थेषु दृष्टार्थत्वे व्यवस्थाहेतुरित्याह एवं चेति तेषां शेषा ५

णामर्थेन प्रयोजनभूतेनापूर्वसाधनव्रीह्यादिनासंबंध इति सूत्रार्थः प्रयोजनं तु स्पष्टमेव ॥ ॥ द्रव्यं चोत्पत्ति-
संयोगात् ॥ ॥ पूर्वाधिकरणोक्तयाव्रीह्यादिपदवशेनापूर्वसाधनताविशेषलक्षणया प्रयुक्तव्यवस्था-
याः इहपदतापृथग्वाक्यवशेनाक्षेपादनंतरसंगतिः स्फ्यश्चेति स्फ्यश्च कपालानि च अग्निहोत्रहवणी च
शूर्पं च कृष्णाजिनं च शम्या च उलूखलं च मुसलं च दृषच्चोपला चेत्युपक्रमः स्फ्यः खड्गाकारो दारुम-
यः अग्निहोत्रं हूयते यया सा अग्निहोत्रहवणी शम्या दारुमयः इमाद्गीनीत्यादिपदात् कपालेषु श्रप-
यति अग्निहोत्रहवण्या हवींषि निर्वपति शूर्पेण विविनक्ति कृष्णाजिनमधस्तादुलूखलस्यावस्त-
णाति शम्यायां दृषदमुपदधाति उलूखलमुसलाभ्यामवहंति दृषदुपलाभ्यां पिनष्टीति वाक्यानां सं-
ग्रहः अंगेषु वतरादिति आनर्थक्यात् तदंगेष्विति न्यायादिति भावः तथा च यत्साधनं साधनानामपूर्व प-
र्यवसानमिति भावः अवयुत्य बद्धीभ्यः स्यादिसाध्यक्रियाभ्यः पृथक्कृत्य तस्मादिति आनर्थक्य प्र-
संगादित्यर्थः वैशब्देति प्रसिद्ध्यर्थकतया प्राप्तिस्तच्चकत्वेन वैशब्दस्य विधिशक्तिप्रतिबंधकत्वादि-
ति भावः ननु द्वितीयाद्वाद्दनादिगतापूर्वसाधनत्वलक्षणायां पृथग्वाक्यवैयर्थ्यापत्तेर्व्यर्थं स-

अध्याय ३

शा·दी·

६ पु

6

किंचित्तत्तापपत्तीति न्यायेनापूर्वसाधनत्वसामान्यलक्षणातात्पर्यग्राहकत्वोपगमादव्याप्तत्वस्यासिद्धिरि
त्याशंक्याह· नचेति· एतावुभयत्वप्रक्रमस्तु तेरन्यथाप्युपपत्तेरित्यर्थः· अस्य· एतदुभयवाक्यस्य· इतरे· ऋद्धंती
त्यादयः· पूर्वोत्तरसूत्रे च स्पष्टं·॥ ॥अर्थैकत्वे॥ ॥वाक्यार्थोपपत्तीति तत्पादार्थानाह· तत्रेति· द्रव्यवा
चित्वेहि विशिष्टवाचिताऽशुद्धद्रव्यवाचिता वा स्यात· आद्ये आह· आकृतीति· द्वितीयं निरस्यति· अन्वयेति
·लिंगसंख्याद्व्यसामानाधिकरण्यानि तु आक्षेपादिलब्धव्यक्तिमात्रपरघटादिपदवदेवे
ति भावः· यत्तु गुणमात्रमेवोच्यते यथा गोररुणाइमादौ तत्र पुल्लिंगमेव गुणागतं प्रतीयते गुणो
शुक्लादयः पुंसीत्यनुशासनात्· अन्यत्र तु आश्रयलिंगत्वमेव· गुणालिंगास्तु तद्वतीति· गु
णवचनानामाश्रयतो लिंगवचनानीति चानुशासनादिति· गुणवचनेभ्यो मतुपो लुगि
ष्ट इति च रूपादिशब्दैर्लक्षणयेन लक्षणया गुणिबोधकत्वादुपपन्नमिति· यौगिकावि
त्यनेन सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयत इति न्यायः सूच्यते· एकद्रव्यवचनत्वेयो
न रूत्यमाशंक्याह· गुणेति· पिंगाक्षीत्वैकवत्सरत्वरूपेत्यर्थः· पिंगाक्षीपदेन विशि राम ६

तस्य इत्यस्यैकहायनीपदेन विष्यायोगादेकहायनगुणमात्रस्य चारुणाय तु न्यत पातस्यापि वि
चार्यत्वस्यादित्यभिप्रेत्य शंकते· न चेदिति· अत्रैवेत्यरुणायेत्यनेन वैषम्यसूचनं· तस्मादरुणाय व
विचार्य इत्याह· तादिहेति· पूर्वपक्षमाह· अमूर्त्तत्वादिति· मूर्त्त द्रव्याश्रिता हि क्रियानुभूयते न चामू
र्त्ते इति विशेषं तु हृत्स्न समर्पणादि क्रियायोगं विना क्रयसाधनत्वासंभव इत्यर्थः· एवं च स्फ्यादेरिव
स्य वाक्यगत क्रियान्वययोगात् तत्वमप्युदाहरणात् पार्थपक्षादनंतरसंगतिः सूचितेति ज्ञेयम् न च
रुणायेति उपन्यक्षरोत्गायेति द्रव्यसंबंधउपपद्यते· अत आह· अनुपात्तानि चेति· कारकशक्तिं क
रणत्वादिरूपां· निः कृष्य· प्रधान्येन· कारकम् उपसर्ज्जनं विशेषणं यस्य करणत्वादि विशिष्ट
मित्यर्थः· विधीयत इति· अपूर्वसाधनद्रव्यमरुणायपरिच्छिन्नं कुर्यादिति कल्पितवाक्येनेत्यर्थः·
न च परिच्छेद क्रियायि कथममूर्त्तेनेति शंक्य· क्रियांतरवैलक्षण्येन परिच्छेद क्रियाया अ
मूर्त्तेनापि साधनस्य प्रमाणासिद्धत्वादिति· वाक्यभेद इति· वाक्यांतरकल्पने व्यर्थ· श्रौतेति·
शक्तिगम्येत्यर्थः· ननु से वारुणाय विशिष्टतया विधीयतामन आह· एकहायनादिवदिति· तरस्य

स्थः शंकते अर्थेति । रूपशाब्दयानन्वयिपि वस्तु एववाक्यभेदाभावेपि विरुद्धत्रिकद्वयप्रयुक्ता
वृत्तिन्न च तया वाक्यभेदापत्त्यापानायं पक्षोपयुक्त इत्याह नैवमिति । स्वार्थरूपादेयत्वमुच्यते परार्थमिप्रदेशस्य व
विधेयत्वादित्रिकपर्याप्तसंख्येनानुबाधत्वादिति हृदयं बोध्यं । प्रकरणे प्रकृतापूर्वसाधनद्रव्ये तत्तापयेति । गुणस्येते
वैवकारेणाद्रव्यव्यवच्छेदः प्रथमपानाप्रकृतस्पर्शान्वितस्वार्थबोधकत्वात् गुणस्यैव चारुत्वमधिकरणन्यायेनपरस्य
शुद्धु इति केवलेनेगुणोपप्रयोगेणाच प्रकृतपर्शत्वात् अमूर्तत्वेनापोग्यतामुक्तानिरस्यति तद्धेति । द्रव्यद्वारेण द्रव्यपरि
च्छेदद्वारेण एतदेवोपपादयन्ति पद्यपीत्यादि । गोद्रव्यस्यतरेभ्यद्भेदकरूपसाधनीभूतगौरित्याकृतत्वबुद्धि
कर्मव्याप्तस्यपरिच्छेदपदार्थः कथमेतत् द्वारकसाधनतावगमइत्याशंक्यपयोग्यतावनादित्याह गुणानांहीति । फ
लितमर्थं दर्शयति तेनेति । द्रव्येणोपलक्षणेन अंतरंगरूपामितिशेषः अरुणागुणोन द्रव्यपरिच्छेदद्वाराकृपकुर्यादित्यावाक्या
र्थो बोध्यः नन्वेवमरुणा गुणात्मपस्य द्रव्यस्यैवानक्षणापाद्गुणोवगतस्यसाक्षादेव करणत्वमस्तु नचश्रुतेकल्प
न्यवरोधान्नैतत्संभवतीतिवाच्यं लक्षितस्य द्रव्यस्य वस्तुतएकहायनीरूपत्वेनविरोधाभावादित्याशंकां नि
रस्यति एवमिति । प्रकृतेलक्षणायामनुपपत्तिरूपकारणाभावात् अरुणामानयेत्यादौ तु आनयनकर्मत्वाच्च

पान्नुपपत्त्या द्रव्यत्वलक्षणाभ्युपगम इति भावः न दोष एवेति क्रयसाधनभूत एवेत्यर्थः तत्र द्रव्यस्य वाक्योपस्थितै
कहायनीरूपमेवेत्याह एकहायन्यामेवेति अयमेवारुणायाः एकहायनीति पार्ष्ठिकान्वय इत्युच्यते वाससा
क्रीणातीत्यादिवाक्यभेदेन रूपभेद इत्यत्र भाष्यसंमतिमाह तदाहेति ननु नात्र वासः प्रभृतिगुणात् रूपभेद
उक्तः किंत्वारुण्यरूपात् स च पूर्वपक्षे क्रीणातेः पृथग्भूतस्यारुण्यगुणस्य रूपभेदकत्वासंभवात् सिद्धांते च वा
क्यभेदाभावादयुक्त इत्याशंक्याह एवमिति भाष्ये हि अरुणैकहायन्योः परस्परनियमे एकवाक्यत्वं कारणमि
ति सिद्धांताक्षेपे भिन्नवाक्यत्वेऽपि क्रयसाधनपरिच्छेदकत्वेनैव रूपांगत्वादेकहायनीसंबंधनियमः सेत्स्यती
ति किमेकवाक्यत्वेनेति शंकित्वोक्तं भिन्नेऽपीत्यादि तथा च विधेयावच्छेदकारुणसाधनकादेकहायनीसाधनकं क्र
योगुणाद्भिन्न एवेति न परस्परमरुणैकहायन्योः संबंधः सिध्येदिति वद्वासः प्रभृतिगुणाभेदाद्रूपभेदस्
तरामपि प्रतीतिभावः कपेकत्ववादिगुरुमतं निरस्यति तेनेति उक्तन्यायेनेत्यर्थः गुणाकर्मत्वात् एकप्रयो
जनकसंनिपत्योपकारिकर्मत्वात् कर्मभेदो हि वैजात्यरूपः वैजात्यं च कार्यवैजात्येनैवोपपद्यते नान्यथा प्रकृते च
सोमप्राप्तिरूपकार्यैक्यात्तद्धेतुभूतक्रयवैजात्यासांगीकारः प्रयोजनवानिति हि गुरुमतं ननु न्यायस्यैतद

8

तिरिक्तविषयत्वादत एव च भाष्यविरोधस्याकिंचित्करत्वान्न दोष इत्याशंक्याह न चेति बलवद्बाधकाभावे या
पसंकोचो न युक्त इति भावः न च तत्र त्याज्जगतया ह्यसोमरसभेदाद्देवताभेदाच्च ग्रहणाभेदेपि न रूपभेद इति
ताच्यं वाससेति निरपेक्षसाधनभूतत्वस्यादिभेदेन रूपस्यापि भेदोपपत्तेः रूपभेदे किं विद्ध्व्यविस्मृतौ तद्व्य
रापुनः कर्तव्यः रूपः ऐक्ये तु प्रधानस्य निष्पत्ते ईव्यापचारप्रायश्चित्तमात्रमिति प्रयोजनस्यापि सत्वाच्चेत्याश
यः ह्वादशाध्यायाधिकरणास्तत्र विरोधमाशंक्य परिहरति रूपरोष्विति भावे ल्युडयं न करणाइति भावः
अर्थैकत्वेनतस्य युक्तैकवाक्यत्वे द्व्यगुणायोरेकरूपरूपकर्मार्थत्वान्नियमः परस्परान्वयरूपः स्यादिति सूत्रार्थः
प्रयोजनं स्पष्टम्॥ ॥एकत्वयुक्तं॥ ॥संगत्विंदर्शयितुमाह एवमिति क्रमेण विधेरंतरंगतया प्रथमं क्रिया
वधातादिरूपातत्तस्तदाश्रयभूतं द्रव्यं ततस्तदाश्रितो गुणाइति क्रमेण संयोगसामान्यनिरूपणानंतरं तद्विशे
षनिरूपणां पूर्वोक्तस्य गुणास्य क्रियांगत्वस्यापवादरूपेणाक्षिपत इत्याह संयोग एव विति श्रुताति एकव
चनश्रुतीत्यर्थः पशुनायजेतेति विधेयपशुगतासंख्याद्दृष्टांतः उद्देश्यपन्न क्षणामिति उद्देश्यपाप्यक्तेर्नक्षिके
त्यर्थः संमार्गकर्मत्वस्य ग्रहत्वजातौ बाधादिति भावः तपाज्ञाया रत्नो को ऽग्रहव्यक्तिप्राधान्यस्य संमार्गक्रि

पापास्तदंगत्वस्य चोपादेयत्वान्नवैनक्षरापस्य प्रकृतोपयोगं दर्शयति · यद्यपीति · सर्वत्र सर्वग्रहेषु · पत्नदुत्तरंसं
मार्गइति विशेषः · प्रयोजनाभावादिति · प्रयोजकाभावादित्यर्थः · प्रधानं ह्यंगप्रयोजकं न त्वंगं प्रधानप्रयोजक
मिति भावः · ननु प्रधानऽपरिच्छेदकत्वेऽपि वसंख्याविधीयतामत आह · प्रतिप्रधानमिति · किंयत्संख्याकानामिति सं
शये हि एतावदिति निर्णयरूपपरिच्छेदाकांक्षा नतु तन्निश्चयसत्तेपीत्यर्थः · द्वाराभावादिति · यथावैतुष्यद्वारां
गस्यावघातस्य वैतुष्यासंभवे क्लृप्तमन्येषु न विधानं तथात्रापीति भावः · ननु परिच्छेदानपेक्षायामपि तत्संख्या
वर्तनार्थमेकत्वविधिरस्त्वित्यत आह · विधीयमानमपीति · ननु श्रुतैकवचनबलान्नान्वैक्षेप्यमप्यंगीकार्यमत
आह · न चैकस्मिन्निति · विधिं विना संमार्गप्राप्त्यभावात्तदभावे च परिसंख्यायाऽप्यसंभवादनेनैव वाक्येन ग्रह
संमार्ष्टिव्यएकातिरिक्तश्च नेति विरुद्धनानार्थबोधनासंभव इत्यर्थः · एवं विधिसंभवमभ्युपेत्य परिच्छेदापेक्षा
भावादिदूषणमुक्तं इदानीमेकत्वविधेरसंभव एवेत्याह · न चेति · विकल्प एवैकं विध्यसंभवमेव दर्शयति · ग्र
हस्येति · एतदेकत्वं ग्रहस्य ग्रहं प्रतिप्रधानं गुणो वा · संमृजेः संमार्गस्य तं प्रतीति यावत् प्रधाने गुणाभूतं वेति वि
कल्पचतुष्टये · सर्वथा सर्वप्रकारेषु · वाक्यभेदआवृत्तिलक्षणाः स्युरित्यर्थः · अस्य · एकत्वस्य · विधेयता · वि

२
रा॰ टी॰
९

ध्यन्वयः तत्र च पक्षद्वयं तत्रेत्यादिना दूषयति विधीयमानमिति विधिना चोद्यमानमित्यर्थः ग्रहद्रव्यस्य ग्रहद्रव्यसं
बंधितया संबंधश्च गुणत्वेन प्रधानत्वेन वेति पक्षद्वयसंग्रहः अर्थद्वयेति ग्रहं संमार्ष्टीत्येकोऽर्थः ग्रहश्चैक:
कार्यैकत्वं ग्रहसंबंधीति वापर इत्यर्थः अत्र च ग्रहपदावृत्तेर्विध्यावृत्तेश्च वाक्यभेदः स्पष्टः एवमपि पूर्वपक्षि
णो नेष्टसिद्धिरित्याह विहितमपीति स्वरूपमात्रोपलक्षकत्वे अथेति · पात · ग्रहस्वरूपमात्रसंबंधपर्यवसाना
त् न संमार्गविशेषणं न संमार्गस्य ग्रहांतरेभ्यो व्यावर्तकं दोषद्वयोद्धारेणाशंकते अथेति संमार्ष्टव्यो यो ग्रहः
स एक इति प्रकारेणेत्यर्थः संमार्गप्राप्तो न तद्विशिष्टतया ग्रहानुवादासंभव इत्याह नैवमिति निर्णीतं नि
र्णीतं एवमपीति एकत्वविशिष्टग्रहस्योद्देश्यत्वेपीत्यर्थः न चैकत्वस्य सजातीयद्वितीयव्यवच्छेदकत्वे नै
वान्वयः अन्यथा पश्वेकत्वविवक्षायामपि पशुद्वयोपादानाविरोधाद्वैगुण्याप्रसंगः स्यादिति वाच्यं अ
नुष्ठानकालेऽपादेयपरिच्छेदार्थतया विधेयस्य पश्वेकत्वस्य सजातीयद्वितीयराहित्यविशिष्टसमवायेना
चयेपि अनुवाद्यग्रहैकत्वस्य परिच्छेदाकांक्षाविरहेण तादृशसंसर्गेणाविधितात्पर्याभावस्य प्रागेव दर्शि राम
तत्वात् एतदस्वरसादाह अपि चेति युगपत् एकाभिधानश्रुत्या संख्याकारकत्वं चेति तथा च संख्याया ९

कर्मत्वेनैवान्वयो न पूर्वं ग्रहेणेति ग्रहविशेषणत्वानुपपत्तिरित्यर्थः अधुनासंमार्गस्य तिप्रधानगुणभावेन
विधिसंबंधपक्षावाशंकते अथेति कारकसत्व कर्मत्वान्वितसत्व आपेहूषणामाहयदि तावदित्यादि ग्रहं संम
र्ष्टीत्येकं संमार्ष्टीति उद्देश्यभेदेन क्रियायाद्वावृत्त्या वाक्यभेदः स्यादित्यर्थः न चेहोद्देश्यभेदादिव पशुनेत्यत्र प
श्वेकत्वरूपोपादेयभेदादपि कुतो नावृत्तिरित्याशंक्याह उद्देश्ययोरिति परस्परानपेक्षैकविधानानाकार
कान्वयस्य क्रियायां निराकांक्षतया असंभवान्नोद्देश्ययोः कर्मकारकरूपयोरेकक्रियान्वयः पश्वेकत्वयोर
वा रुणैकहायन्ययोश्च परस्परापेक्षयोर्न्वयायां परस्परानपेक्षेति विशेषणं न च ग्रहैकत्वयोरपि परस्परापे
क्षत्वान्न दोष इति वाच्यं ग्रहाणां नितांतसंख्यतया अपेक्षाभावस्य प्रागेवोक्तत्वात् एकस्यामेव क्रियायां
करणाधिकरणाद्यन्वयादेकविधेति निमित्तकर्मणोरेकक्रियान्वयाकारके ति न च तर्हि निमित्तद्वयो
पादाने वाक्यभेदो न स्यादिति वाच्यं तत्राप्यनुष्ठापकत्वरूपनिमित्तत्ववशेन द्वयोरपि भाव्यद्वयाक्षेपक
तया कर्मकारकानेकत्वप्रसंगेन वाक्यभेदोपपत्तेः कारकनानात्वं च नानापदबोध्यत्वं तेनैकपदवोध्यना
नाकर्मकारकसत्वेपि सर्वेभ्यो दर्शपूर्णमासाविन्यादौ न वाक्यभेद इति दिक् ग्रहापेक्षयेति ग्रहान्वितत

पेमर्थः एवमेकत्वापेक्षपेसापितेपं अतश्चयथाप्राप्तानुवादकमेकवचनमितिनैकत्वस्याविधिविषयत्वमि
त्युपसंहरति तदितिः ग्रहमिमेकत्वेन पुंक्रसमभिव्याहृतं संमार्गादिएकस्यैकोविपर्प एकवचनश्रुतिसंबंधा
दितिसूत्रार्थः प्रयोजनंस्पष्टम्॥ ॥संस्कारस्य॥ ॥प्रसुद्ग्रहरणासंगतिं दर्शयन् विचारयमाहः किमिति पू
र्वपक्षमाहः तत्रेति सोमस्यसोमरसस्यावसेकोनिष्यंदस्तस्यनिर्हरणामपनयनं सोमपात्राणामन्यपनं
तरंसंमार्ग इतिशेषः ननुग्रहत्वस्योपलक्षणत्वेपि विलक्षणापूर्वसाधनत्वस्यैवलक्षणत्वाच्चमसेषु तदभा
वान्नसंमार्गः स्यादत आहः अपिचेतिः नचसोमपात्रस्यैकजातीयत्वेपिग्रहादिसाध्यतन्नदभ्यासापूर्वभे
दाद्व्यवस्थेतिशंक्यं अनेकाभ्यासापूर्वाणां धर्मप्रयोजकत्वे गौरवे णातदसिद्धेरितिभावः ग्रहत्वाविव
क्षायां किंवाक्यभेदोहेतुरुता पूर्वसाधनत्वलक्षणायांवा आवश्यकत्वात् द्वपक्षणाताः तत्रनाद्यइत्या
हः नहीतिः द्वितीयेतु ग्रहसाध्यापूर्वभेदानस्यैवशीघ्रोपस्थितत्वेन दीक्षणायावाङ्गिपमन्यायेनलक्षणा
च्चमससंमार्गसिद्धिरित्याहः यागैकत्वेपीतिः गुणानां संमार्गादीनामव्यवस्थाचमसादिसाधारणापू-
कुतः संस्कारात अपूर्वसाधनगतदृष्टप्रयोजनसंस्कारत्वादितिसूत्रार्थः कंगोक्रमेवप्रयोजनम्॥ ॥अ

नर्थक्यात्तदंगेषु॥ ॥सप्तदशेति अरत्निशब्देन कूर्परमारभ्य कनिष्ठिकाग्रपर्यंतहस्तपरिमाणमुच्यते॥ उ
द्देश्यतयावगम्यमानस्य यूपपदार्थस्य विवक्षया आक्षिप्यसमाधानादनंतरसंगतिः तदर्थं चेति वाजपेययूपस्यो
द्देश्यत्वे वाजपेयांगत्वं यूपस्योद्देश्यत्वेन द्वारेण पश्वंगत्वमिति भावः प्रकरणेति वाजपेयप्रकरणपा
ठो हि वाजपेयांगत्वे घटते नान्यथेत्यर्थः ऊर्ध्वपात्रं षोडशिग्रहरूपं सादृश्यात खादिरत्वोर्ध्वत्वादिरूपा
त् द्वारसंबंधस्यार्थिकत्वापेक्षया शाब्दत्वमेव वरमित्याह यद्वेति सिद्धांतमाह स्यादेवमिति वाज
पेययश्रुतेरिति पूर्वाधा चापि नासौ नन्नक्षणया क्रतुना वाजपेयेन प्रकरणादिति अधिकाराख्यप्र
करणावशेन वाजपेयापूर्वसंबंधित्वस्य यूपपदेनल्लक्षणयादिति भावः नचदीक्षणीयावाक्ये ममन्या
श्र पेन यूपपश्वपूर्वसाधनत्वन्नैरोव किंनस्यादिति शंक्यमसप्तदशारत्नित्वविनापि प्रकृतोपयूपप
श्वपूर्वयोः सिद्धेरानर्थक्यस्यापरिहारादिति प्रधाने वाजपेये आनर्थक्यात्तदंगेषु सप्त
दशारत्नित्वं भवतीति सूत्रार्थः प्रयोजनंस्पष्टम्॥ ॥कर्तृगुणे॥ ॥दर्शेति एतत्सर्वपक्षबीजप्रदर्शनं
प्रयोजनेति सिद्धांतबीजसूचनं अभिक्रामामिति आभीक्षायेणामुत्तत्वे चेति क्रियापदतोणामुन्नविधाना

दभिक्रम्याभिक्रम्येत्यर्थः आहवनीयाभिमुख्येन क्रमणं गमनमभिक्रमणं· पूर्वाधिकरणो वाजपेयप्रकरणो
न प्रयरूपोद्देश्यविशेषासिद्धिवदिहापि दर्शपूर्णमासप्रकरणावशेन होमरूपोद्देश्यविशेषलाभप्रसक्तौ तद
पवादादनंतरसंगतिः सिद्धमिति· सामान्यशब्दस्य सन्निधिवशेन विशेषपरत्वस्य व्युत्पत्तिसिद्धत्वादिति भावः·
प्रकरणाकर्षैति· प्रक्रियत इति प्रकरणमिति व्युत्पत्त्या प्राकरणिकेत्यर्थः· कारकस्यैवेति· यद्यपि निमित्ताद
रकारकस्यापि वाक्यीयक्रियान्वयो दृष्टस्तथाप्यत्र क्रियायाः पाठेन व्यवच्छेदेतामर्पयं जुहोतिना जुहोतिपदेन्नत्र
नुपादानादिति· अनभिधानादित्यर्थः· वस्तुतस्त्वपाठेपि तिव कारकत्वेनानिर्देशात्र कारकत्वपनेति वैष
म्यं बोध्यं तस्मात ऽक्तहेतोः· विच्छिन्न· वाक्यादृष्टयभूत· प्रकरणेन इति कर्तव्यताकांक्षारूपेण· संभवति
होति· वाक्यायोहि क्रियान्वयः· कारकत्वेनैव· प्राकरणिकत्वप्रयाजादिवद् यकारकत्वमन्त्रेणापि संभवती
त्यर्थः· सद्भावमात्रेण· न क्षरणादिनोपस्थितत्वमात्रेण· कर्त्रैति पूर्वो चापि· होमस्य· प्रयाजहोमस्य· [होमस्या]
क्रांतमिति रागमुन्नेत द्वोपि समानार्थकत्वाद्युक्तं· धातुसंबंधे प्रत्ययाइत्यधिकारेणामुन्नविधाना 
दिति भावः· फलवदिति· फलवत्याभावनायाः ऽद्धूतेन ऽत्कटेन कथंभावेन कथंभावपोदितिपोगसमर्थामवं 

विनि

ति॰ कुत इमाशंक्यतत्रबाधकमाह प्राङ्ख्युरिति॰ यथाबर्हिर्न्नानातीमादपोधर्मी अंगप्रधानसाधारणासकलब
र्हिषांतथेत्यर्थः॰ अवांतरप्रकरणांगीकारे पूर्वोक्तं बाधकं परिहरन्सिद्धांतमाह॰ भवेदेवमिति॰ तेषांप्रयाजाना
वचनेनवाचकप्रयाजादिशब्देनसंयुक्ताइत्यर्थः॰ संदष्टं॰ तन्मध्यगतं॰ इदं॰ अभिक्रामंजुहोतीतिपर्वाच्चपि॰ त
तः॰ प्रयाजेभ्यः॰ वाचनिकांगसंदंशमेवदर्शयति॰ प्रयाजानिमादिनाऽपभृतः॰ पात्रविशेषादाज्यंसमानयत
इत्यस्यप्रयाजद्वपार्थाज्यसमानयनविधिः॰ मिथुनंस्त्रीपुंरूपं॰ समिधोयजतीतिस्त्रीरूपसमिद्देवताकः॰ प्र
थमप्रयाजस्तन्नूनपातमितिपुंमेचत्वइतिवेद॰ एवमिसोपजनिबर्हिर्यजतीमन्त्रापि॰ एतस्योपपादनं
समिधोवन्हीः॰ तनूनपातमेकामिमादिअपमर्थः॰ प्रधानस्यश्रुतफलत्वेनेतिकर्त्तव्यताकांक्षायामंगाना
तदुपकारार्थत्वावगतौकथमुपकर्त्तव्यमित्यंगेतिकर्त्तव्यताकांक्षापश्चाद्भवतिपतेसाचप्राकरणिके
सर्वांगग्राहकपूर्वप्रवृत्तत्सोपनीव्यप्रधानेतिकर्त्तव्यताकांक्षानिरुद्धावाचनिकैदेशिरोतिकेश्वांगेरूपशा
म्यताम्युत्सर्गः॰ वाचनिकांगसंदष्टेतुनप्रधानाकांक्षावाचनिकांगवत्तन्मध्यगतस्याप्यन्यापेक्षितत्वेना
वगमादितिपुत्रस्तस्यांगकथंभावेनग्रहइति॰ समाप्यते॰ निराकांक्षीभवतीति॰ गुरुमतं दूषयतिपक्षेव

गति

ति॰ साद्यिकाराणां॰ फलवतां प्रधानानां॰ नचानुष्ठेयेकप्यामि याकांक्षा अनुष्ठेयस्य फलवत्वान्नियोगस्यैव प
रमापूर्वीरव्य इति तस्यैवेति कर्तव्यताकांक्षापूरके यारोक्ष्याहे॰ तान्यपीति॰ अंगत्वापूर्णीतायपीत्यर्थः॰ अन्या
र्थः॰ अप्योपकारार्थं॰ स्वनिष्ठं स्वफलार्थं॰ नकेवलं प्रक्रिविरोधः॰ प्रकृताधिकरणासिद्धांतभंगोपि दूष
णमित्याह एकदेशिनामिति उत्तराधिकरणातैपर्थ्यात्रैववक्ष्यमाणामिहतानघ्व्देनोक्तं कर्तगुरोऽअ
भिक्रमणादौ प्रयाजादि कर्मणापसमवायाद्वाक्यभेदः प्रयोजवाक्यैकवाक्यत्वाभावः स्यादिति सूत्रा
र्थः॰ प्रयोजनं पूर्वपक्षे सर्वे होमा अभिक्रम्यकार्याः सिद्धांते तु प्रयाजहोमएवाभिक्रमणामिति स्पष्ट
म॥ ॥सदिग्धेनु॥ ॥सामिधेनीरिति॰ समिध्यमानाग्निप्रकाशिका ऋचः इत्यर्थः॰ प्रथमां सामिधेनं
मि त्रिवारं मेत्याह अनुब्रूयात त्रिरुत्तमामि [illegible] इतरवाक्ये॰ उत्तमां॰ अंत्यां॰ निविदोप्यग्निसमिंधनप्रका
शकाः काम्याः प्रतिष्ठादिफलार्थाः॰ कल्प्याः प्रयोगाः॰ एकविंशतिरनुब्रूयात्प्रतिष्ठाकामस्येत्यादि ह
पादेवन्नक्ष्म देवचिह्नं॰ उपवीतं देवानामिति श्रुतेः॰ मंद्रोच्चस्वरयोरंतराम मध्यमस्वरेणोक्तं तरेति गुणा राम
विधेरर्थः॰ अप्रवांतरप्रकरणापवादरूपामनंतरसंगतिं दर्शयन्न्यक्रसंशयहेतुमाह॰ तदर्थं चेति॰ नि १२

विद्वांसामिधेनाप्रकरणाविच्छेदकत्वं निराकरोति · निविदास्त्विति · यथाप्रकृत्यो हं देवयजनपेति मं
त्रो दर्शपूर्णमासप्रकरणपतितोपि न तत्प्रकरणाविच्छेदकस्तथे · ननु बहूनां निविदां परप्रकरणाच्छेदकत्वकल्पनापेक्षया
न्यवाचनिकांगानामनारभ्याधीतत्वकल्पनैव लघीयसीमत आह · अथ वेति · तादर्थ्ये · सामिधेन्यंगत्वं · अग्निसमि
धनरूपफलप्रकाशनद्वारा · स्वर्गरूपफलप्रकाशनद्वारा अगत्म · सुवरिति मंत्रस्य दर्शपूर्णमासांगत्वमेवेति भावः · ए 
कविंशत्यादिकाम्यविधिभिः प्रकरणाविच्छेदमाशंक्य निरस्यति · काम्येष्वपीति · आश्रयत्वेन · एकविंशत्यादिसंख्या
श्रयत्वेन · तासां सामिधेनीनां · सिद्धान्तमाह एवमिति · अत्र उपस्थितिरूपसंनिधेरेवासंबद्धपदेन विच्छेदो न तूभया
कांक्षारूपप्रकरणस्य · अन्यथा पूषानुमंत्रणमंत्रेणादर्शपूर्णमासप्रकरणाविच्छेदापत्तेरिति गुरुमतं तद्दनिष्टाप
मातावद्दूषयति · तस्येति मत इति शेषः · तस्मात्संनिहितोभयाकांक्षैव प्रकरणं नोभयाकांक्षामात्रं तद्विच्छेदश्च सं
निधिविच्छेदात् · पूषानुमंत्रणे न तु न दर्शसंनिधिविच्छेदः · आग्नेदर्शोद्देशविहितानेकांगसंदंशोपतितत्वाभावादि
ति भावः · फलावच्छेदेनेति · फलविशिष्टतयेत्यर्थः · विकृतिष्वादीति · विकृतेष्वकृतोपकारप्राकृतांगेष्वेवाकां
क्षा न तु संनिहितेष्विति न प्रकरणाभिमर्थः · सामिधेन्यनुवचनस्यैकस्यैव विधानात्काम्यवाक्ये च तद्द्वाश्रितसं

ख्यामात्रस्य पक्षे विधानात्कस्य विकृतित्वमित्याशंक्य प्रकृतिविकृतिभावमुपपादयति इहेति । अनुवचनांतराणां का
म्यानुवचनानां ननु निमित्तकाम्ययोरनुवचनयोः कथं निगदानंतर्यसंभवोऽत आह एतैरेव चेति । काम्येन गोदोहनेन प्र
संगात्प्रणयनसिद्धेश्च वसनिहितवदित्यर्थः । द्वादशेति । ज्योतिष्टोमप्रकरणे तिस्रः साह्नस्योपसदो द्वादशाहीनस्येति वच
नेन यथाहीनाख्यद्वादशाहादिद्रव्यस्य प्राप्तानुवादेन द्वादशसंख्या उपसदो नामेष्टिविशेषा विधीयन्ते तद्वदित्यर्थः । वस्तुतस्तु
गुणविधिषु सामिधेनीप्रकरणानुक्रमणिकाकारैस्तेषामनुवचनसामान्यांगत्वहानिरूपाणि ष्प्रसंगोऽपि बाधकः इत्या
ह यद्वेति । पूर्वाधिकरणे भावितं गुरुमते दूषणांतरमाह एकदेशिनामिति । तन्मतानुसारेण दूषणोद्धारमाह कश्चिदिति
। उपव्यानक्रियायाः कारकसापेक्षत्वात्कर्तुर्होतुः केवलं तास्संपादकत्वे याचकत्वे धर्मत्वावगमात्कर्तैव एकविंशतिरनुब्रूयादि
ति सन्निहितकर्म्यवाक्यापोत्थिते नान्वीयत इत्यर्थः । प्रयाजयार्थेति । परिप्रश्नपदं पदांतरेणान्वेतीति व्युत्पत्तेः प्रयया
नां प्रकृतसमर्थान्वितस्वार्थबोधकत्वात्तत्प्रधानापूर्वान्वितस्योपव्यानस्य तन्निपोत्थसंस्कारद्वारकत्वावगमात्तत्सामि
धेन्यंगत्वसिद्धिरित्यर्थः । ननु प्रत्ययेन सन्निहितसामिधेन्यपूर्वस्यैव बाधानात्सामिधेन्यंगत्वमेव भवेदित्याशं
क्याह प्रवरणं चेति । संनिपातित्वेन अग्निसामिधेनरूपदृष्टार्थत्वेन तदंगं अधिकारापूर्वांगं । एतदेव प्रधानापू राम १३

र्वान्वितत्वेनाभिधानं गुरुमते ग्राहकग्रहणाभिमुच्यते नन्वप्रधानविषयकत्वेनावगतेर्विषयत्वेनासंभवादन्विताभिधा
नान्यथानुपपत्तिरूपचतुर्थ्याख्यापप्रतिपाद्योपादानाख्यप्रमाणेनप्रधानरूपविषयावगतत्वद्वारेति स्थितिः ननूपव्य
पन इतिसाध्यतयाभिधीयमानायाः क्रियायाः कर्मकारकाकांक्षोत्थकथासंनिहितकर्त्रन्वितायाः स्वाश्रयपूर्वान्वयः स्यादि
भवत्यपेक्षसंनिधिविशिष्टसाधनापेक्षेति नाधिकरणावैयर्थ्यमत आह अपि चेति विच्छिन्नमपि भाष्योक्तरीत्याकर्मता
कर्मार्थत्वायोगान्न होतीमस्माद्विभक्तेस्तदेकवाक्यतानापन्नमभिप्रेत्य कपदत्वादिमनंतरं अन्विताभिधानापत्तिपर
त्वाय क्रियात्वेन कर्त्रकांक्षायास्तत्रापि साम्यान्न प्रथमं प्रधानापूर्वान्वयोपेन तत्प्रयोगकर्त्रसंबंधस्यादिति भावः सा
ध्यत्वेनाभिहितायाः क्रियायाः कारकभूतकर्त्रकांक्षाबलात्तदन्विताभिधानेनान्विहतत्वेति शंकते नन्विति किंशेषि
णान्विताभिधानेनेष्यते किं वा शेषिभूतकर्त्रापेक्षितो नानुष्ठानभूत इति तत्राद्ये दोषमाह नैवमिति प्रमयानं
प्रकृतमर्थान्वितस्वार्थबोधकतयाव्हतो मस्यापि कार्यान्वितावघातबोधकत्वमिति भावः न केवलं क्रियापदमेव
तथा व्रीहिसोमादिपदान्यपि प्रणाड्याकार्यान्वितस्वार्थपरायणेत्याह अपि चेति नहीति व्यवहारेणान्वितस्ये
वोपस्थितस्तैवरा क्रियाग्रहो चिन्त्यादिति भावः अनपेक्षितत्वात् सिद्धतयावगतेनाभिक्रमणोनोकांक्षितत्वात् ए

केति गृह्णोतिनेत्यादिः ननु प्रधानस्य सर्वांगग्राहकत्वात्तदृचिनाभिधानेपि न ह्यतिरिक्तशेषिणागन्विनाभिधानाभि
माशयेन शंकते प्रधानेति इध्मसंकोचकल्पने मानाभाव इत्याशयेन दूषयति नेति एवं समुपवीतस्यापि प्रधाना
न्वयसिद्धावेतदधिकरणापेक्षयाभिप्रायाह उपवीतस्यापीति तत्संभवात् प्रधानान्वयसंभवात् अनभिहिते अनन्वि
ताभिहितग्राहकं परमाप्रवं द्वितीयपक्षं दूषयति यद्यपीति अविहितस्य सिद्धवत्प्रतीतेरिति विद्धकहेतुना विध्य
न्वयपानहेतस्य कर्त्रपेक्षा अनुष्ठानकर्त्रपेक्षाप्तत्वाभावात् अविनाभावात् सूत्रार्थेष्टा सामिधेन्यंगं दर्शपौ॰ गं चेति
संदिग्धे उपवीते निर्विप्त्वविधेर्वा पाठ्यवधानाद्वाक्यभेदः सामिधेन्येकवाक्यत्वाभावः स्यादिति प्रयोजनेसय ष्टम॥
॥गुणानां॥ ॥आधानेति वरणाविकंकतौ वृक्षविशेषौ पज्ञाव चर्पते संपाद्यते नेनेमवचरोपत्पात्रं तत्र वार
णानां होमव्यतिरिक्तकार्ये द्वारापत्तां गता नत्वेतेन जुहूपादिति वचनात् वैकंकतानां तु स्रुक्त्वादीनां होमत इतिरिक्ता
भिघारणादिद्वारेति प्रदेशांतरे पात्रविधितो द्वारप्रदेशो अत्र चोपवीतस्य व्यवहितसामिधेन्यनंगत्ववमाणानाम
पि व्यवहितपवमानेष्टिमात्राङ्गत्वेन समुच्चयत इति प्रसंगसंगतिर्बोध्या वाक्यादिति अग्नारेणावोवास्यंतमिति वेदाह राम
वनीयइति समसमीसंस्कार्ये परत्वात्संस्कारकत्वेन पवमानेष्टिहोमस्यत्र जुहूपादित्यनेन विधानमितिभावः एतद १४

क्षिपति। नन्विति। अनारभ्येत्यनेनतु होतेर्विधेयपरत्वे प्रकरणांतरन्यायेन कर्मांतरविधिः स्यात्तद्दूरस्थपवमा
नेष्टेरंगत्वं गतम्। अन्यथा विश्वजिदादेरप्यंगत्वं गतापत्तिरिति सूचितं गुरुमतेन समाधानमाह अत्रेति। प्रधानप्रत्या
स्या। आधानद्वारा। स्वसिद्धांतेति गुरुमतसिद्धांतविस्मरणादिप्रयुक्तः। असाधत्वएवेति ५ प्रकारमतनपतइत्यर्थः। प
अत्रासन्नत्वमप्युपलक्ष्यं। अंगत्वं हि योग्यतारूपं अरणापस्थेदं इत्यादिवच्छास्त्रगम्यं न बाध्यते अन्यथाख्यातिप्र
संगेनाप्रामाण्यापत्तेः किंत्वशास्त्रस्यानुष्ठानबाध [illegible] अंगीकारेणाविरुद्धं मात्रं। न च बाधस्थले शास्त्रेणांग
त्वमेव न बाध्यत इति वाच्यं। तथा सति प्राप्तबाधप्रसंगात् दशमाध्याये चन्द्रु प्राप्तबाधस्य प्राप्तबाधत्वांगीकारेणावि
देशात्। कृष्णलचरावप्यंगत्वेनावघातप्राप्तेरावश्यकत्वादिति हि गुरुमतसिद्धांतरीतिः। तच्चेति। अन्यथा प्रकृत
वग्न्यपेनुष्ठितमपि अग्न्याद्यस्यार्थिकस्यापि विकृतावतिदेशात्तेनैकनक्षत्रापायरूपप्रकारान्तेसमूहोनसिद्ध्ये
दिति भावः। अभ्युपेत्याह प्रतीतीति। येन केनापि। देवतात्वेन प्राशप। ऊर्ध्वत्वे। आधानरूपकर्मांगत्वं। साध्य
त्वं। अग्नीनां पवमानेष्टिसाध्यत्वं। किं तर्हि स्यादत आह विश्वजिदादिति। अंगत्वं। पवमानेष्टिप्रति। नन्वग्नीषोमीया
नुबंध्यायोः प्रकृतिदृष्टयोर्वापर्यमार्थिकमपि साधयत्वेपत्नीसहपशूनामन्वितइति सहानुष्ठाने न कृतं तथेहा

15

पिसाक्षात्संबंधइत्यातिदेशिकोप्युक्त इत्याशंक्याभ्युपेत्याह अस्त्विति चेति· वस्तुतस्तु साध्यतांगाकारेपि न साक्षात्संबंध
सिद्धिरित्याह· अपि चेति प्रकृतावपि न साक्षात्संबंध इति निर्मूलत्वेनैवपकल्पनेत्याह अपि चेति· अस्यान्यादिति· कस्यापि
प्रकारवापाभिमत्यर्थः वार्त्तिककारमतमाह· आवापेष्विति· ननु व्रीहीन्वहंतीत्यादिवाक्ये प्रकरणावशेन व्रीहिपद
स्य प्रकृतव्रीहिपदस्य वदन्यापि पदस्य प्रकृतपवमानेष्टिपरत्वंस्यादित्याशंक्य तद्दूषणमप्याह· व्रीहीनित्यादि
ना· तद्वशेन· प्रकरणावशेन· साधनेति· अपूर्वसाधने त्यर्थः· न च्विहापि पदस्वरूपमात्रेपाचारणामानर्थक्यात्ल
क्षणाश्रयणात्तन्मतमाह इहापीति पदार्थत्वेपि· पदमात्रार्थत्वेपि आनर्थक्याभावात् पदमात्रस्यापूर्व
व्यभिचारेणापदपदेनैव प्रकरणं विनाप्यपूर्वसाधनपदमात्रेपात्रविधानेप्यानर्थक्याभावात्· न लक्षणेति
न पदपदलक्षितापूर्वद्वारा आधानापूर्वलक्षणेत्यर्थः· स्वापूर्वलक्षणात्तदीक्षणीयावदवरप्रसंगोका
पैव· सा तु पदपदमात्रेणागम्यत्वात्स्फुतिसमानतया निर्दिष्टा· लक्षितलक्षणापरं निराकृतेति ज्ञेयं· साति
संभव इति· असंभवे तु दूरक्ष्यस्याप्यनुवादो मया कृदृशाहीनस्येत्यत्रेत्यर्थः· संनिहितगामित्वादि मस्यप
वमानेष्ट्यनुवादेनेत्यादिनान्वयः· प्रकृतिवदिति· प्रकृतिवद्वाक्यपेपेन भावपेदिति वाक्यपेपविशेषभूतेन

प्रकृतिवदिति शब्देनोपस्थिते वाक्यपेयांगपश्वसंबंधिप्रयाजे इत्यर्थः कृत्स्नन्नेति सौर्ययागप्रकरणोप्रयाजे प्रयाजे
कृत्स्नत्वं गुणोत्त्वास्मिवचनादित्यर्थः सूत्रप्रयोजनमाह पक्षांतरत्वेनेति शंकापदोत्तरसमर्पकत्वेनेत्यर्थः तान्येवशं
कापदान्याह नन्विति अधिकरणांतरत्वेतु पूर्वपक्षे आधानार्थसंपादितवारणादिपात्राणां दैवात्त्राशे दर्शा
दौ वारणादिनियमाभावः सिद्धांतेतु तन्नियम इति प्रयोजनम् ॥ ॥ मिथश्च ॥ ॥ वार्त्रघ्नाविति अग्निर्वृत्राणि
जंघनत् द्रविणस्युर्विपन्यया समिद्धः शुक्र आहुत इति हे वृत्रहन्गुणकाग्निदेवत्या एतद्गुणावेसोमदैवत्या
तु त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा त्वं भद्रोअसि क्रतुरिति तथा अग्निः प्रत्नेन मन्मना शुंभानस्तन्वं स्वां क
विर्विप्रेण वावृधे इति वृधन्वद्गुणकाग्निदेवत्या सोमगीर्भिष्ट्वा वयं वर्धयामो वचोविदः सुमृडीको न आविशेति त
था विधसोमदेवत्या वार्त्रघ्नी इति वृद्धवचनोक्तं सुपासुनुकूपर्वसुवर्णामादेनापूर्वसवर्णात्पेकारांतता लुग्वा
नोध्यः एवं वृधवचनो इमंत्रापि तेषु वाक्ये न संनिधिबाधस्य पूर्वाधिकरणोक्तस्यापवाददेनांतरसंगतिः सूच
यन्नसंशयं दर्शयति किमिति नाभ्यामिति पंचमी एवं पक्षमाह कान्त्स्येति मंत्रस्य हि विधेयस्य प्रयोजनाका
क्षावशात्स्मरणायेन संबंधोपुस्यते कान्त्स्न्याद्वयोगाद्देवेव स्मरणायोनप्रयोगमध्य इत्यर्थः पद्धायेतन्मं

३ ६

रा·टी

१६

10

त्रावाच्यतयास्मरणानर्हत्वादित्यर्थः एवं समयिपदिकान्नप्रकरणोस्यात्र दाकान्नकर्मांगपवाचकस्यकान्नपरत्वमेवस्या
न्नतुतंत्रीत्याह · नापीति · कर्मपरत्वेऽग्नेहेतुद्वयव्यतिरेकमाह · कर्मणाइति · पौर्णमास्यमावास्याशब्दयोः कर्मपरत्वम
भ्युपेत्यसिद्धांतमाह · यद्यपीति · नप्रधानत्वसंभवः नकर्मणाः प्राधान्येनान्वयसंभवः पूर्वेद्युरित्यादौ कथंतत्संभव
इत्याशंक्यतद्वैषम्यमाह · पूर्वेद्युरिति · तत्रभाव्यस्यान्यतोनवगमात्तस्यरतयासाध्यत्वेनश्रवणमित्यर्थः इहतुलिं
गक्रमाभ्यामाज्यभागरूपभाव्यलाभात्पौर्णमावास्याकर्मणोप्याधारत्वस्यतत्प्रयोगमध्यानुष्ठेयपद्धारेणामं दृ
प्रातःसवनइत्यादौदर्शनान्नलक्षणेत्यर्थः लिंगविरोधादपिनप्रधानांगत्वमित्याह · नचेहेति · सोमस्यसो
मदेवताकस्य · ननुमनोतामंत्रवत्सोमरूपैकदेशप्रकाशकस्याप्यग्नीषोमप्रकाशकत्वोपपत्तिरतआह · अग्नेरिति
· अग्नेपथ्यार्थत्वं · ऐन्द्रागार्हपत्यमुपतिष्ठत इतिवदन्यार्थस्याप्यन्यप्रकाशकत्वे · तद्वैषम्यमाह · लिंगं हीति · त
त्रगार्हपत्यमिति · श्रुत्यालिंगबाधः इहत्वमावास्यायामितिनश्रुतिः किंतु समभिव्याहारात्मकवाक्यगम्यान्न
श्रवणेतिवाक्यमेवतद्वल्लिंगाद्दुर्बलमित्यर्थः नश्रुतेः नश्रुतिवशात् विधिवाक्यस्यमंत्रलिंगापेक्षयादौर्ब
ल्यस्यवक्ष्यमाणत्वाद्यत्रापिमंत्रलिंगबाधोस्त्वित्याशंक्याह · अथापीति · मंत्ररूपं · मंत्रलिंगे · कर्मकारिको

व्यवस्थां दर्शपति पौर्णमासी गतयोरिति । तदंगयोरित्यर्थः वस्तुतस्तु नात्र पौर्णमास्यादिशब्दः कर्मपर इत्याह पक्षे इति
· न च पौर्णमासी कालिकौ पावायाग्रभागा विततकालिका अग्रभागलक्षणा पत्रिः निगूढमाभ्यामेवाग्रभागसंबंधत्वा
भेन पौर्णमासी कालेने इमौ मंत्राविति एव व्यवस्थोपपन्ने व्यवस्थापाः प्राप्ति पूर्वकत्वेनार्था दात्रग्रभागद्वारकत्वाभो
पपत्तेरिति भावः प्रधानस्य मंत्राणां च मिथः परस्परमर्थसंबंधः प्रकाश्यप्रकाशकभावेनेति स्वचार्थः ॥ प्रयोज
नं स्फुटमेव ॥ ॥ अनंतरं ॥ अवनेजनं प्रक्षालनं उन्नपातन्वनत्त्वणानि उशीरत्वणानीति धूर्तस्वामी ॥ पृष्टी करोति
· कातन्ने इति शेष आर्थिकः वा चोपमननेमौ न आवेदयतीति अदाभिषायंपद्यमान इत्यर्थः पृः कथयतीत्यर्थः सर्वे
षनेनानं तर्यहरूपक्रमस्य विनियोजकत्वं पवादाद नंतर संगति सूचने प्रकरणात्क्रमस्य दुर्बलत्वात् हृएके इति
अनंतरेणाशीघ्रमेकवाक्यत्वावगमात्तस्य च प्रकरणाद्बलीयस्त्वादिति भावः अवांतरेत्यापीतत उपन्यासः सदृशा
भावात् पाठ्यमानयोरपि मुष्टीकरणमौनयोराघ्यर्थवद्भित्तावेदनांगत्वं द्वीक्षाव्यंतकत्वात् दुपपद्यते अनंतरेणौक
वाकतामुक्तां निरस्यति न चेति · यच्छदोपबंधो पस्योभयंहविरानिमार्क्षेदे इपंचशराच्च मोदनं निर्वपेदित्याहो
· आदिनाकाप्रस्य पादिर्गृह्यते सूत्रे अचोदनेत्यस्याप्रयोजकमित्यर्थः प्रयोजनं पूर्वपक्षे स्वकालेविस्मृतम

३

रा·दी·
१२

मवनेतन्नादिस्तरराणोत्तरं न कार्यमसिद्धं तेनकार्यमिति ॥ शेषस्तु ॥ ॥ ऐंद्राग्नस्य दर्शे सान्नाय्याभावपक्षे तेयः अपवाद
संगतिंसूचयन्संशयमाह किं सर्वेषामिति· कार्ययोगी· विधयश्च ये· यथा यदाग्नेयोष्टाकपाल इत्यादौ· देवताग्न भू
तेन· देवतास्वरूपेण· आदर्तव्यमिति· प्रधानभूतसंस्कार्यद्रव्यासंकोचाय गुणाभूतदेवतात्वभागेन संबंधमात्रेण
द्वितयं लक्षणीयमिति भावः न लक्षणायां मानाभावादाह अथवेति· भूयमानद्रव्योद्देश्यत्वस्य प्रत्येकं सत्वात् यथ्य
दावानयेयज्ञकर्मेव वदिमर्थः अग्नीषोमीयादावितरयोगवशेन सोमसापेक्षस्याग्ने देवतावादाग्नेयशब्दे न
तदभिधानस्यासामर्थ्येनासंभवादाह यद्वेति· केवलादग्नेः अग्निशब्दात् समुच्चरन् इत्यापं माणाइत्यर्थः अ
विरुद्ध इति· अनुशासनाविरुद्ध इत्यर्थः· यद्यपि चेयमनेन संबंधमात्रेणाक्षणिकत्वमेवेति सूचितं· लक्षणायां
त्वत्कृहविरूपलक्षणार्थत्वात्· शास्त्रान्तरवचनेन सर्वपुरोडाशार्थत्वमाशंक्य निराकरोति यदयाति· बर्हिषदं· ब
र्हिः स्थितं· न चात्र प्राप्य चतुर्धाकरणानुवादेन बार्हिषत्वमात्रं क्रमो वा विधीयत इति न सामान्यवचनत्वमिति
वाच्यं· चतुर्धाकरणस्यापि तत्त्वाग्नेयपुरुषान् प्रतिविधानोपपत्तेः न च तदनुरोधेनाग्नेयशब्दस्यैव सामा राम
न्यपरत्वं कुतो नेति शंक्यं· जहल्लक्षणापत्तेः· तदपेक्षया पासामान्यशब्दस्यैव विशेषपरत्वौचित्यात्· न चैवंवि १२

धोपसंहारे मानाभावः अन्यथा विकल्पापत्तेरेवं लक्षणातात्पर्यग्राहकत्वात् न च सामान्यशास्त्रानर्थक्यं तद्व्यापारवि
षयप्रतिबोधकत्वोपपत्तेरित्याशयः गुणेन च तदर्थाकरणासंस्कारेणासंपृक्तः शेषः प्रयाजशिष्टः सकलपुरोडाशाल्प
यः प्रतीयेतेति सूत्रार्थः प्रयोजनं स्पष्टम्॥ इति श्रीमदापदेवाख्यप्रमाणाभिज्ञतत्सूनुनामत्त इालन्तकृतायां शा
स्त्रदीपिकाटीकायां प्रभाख्यायां तृतीयाध्यायस्य प्रथमचरणः संपूर्णः॥ ॥अर्थाभिधान॥ ॥पूर्वपादेन
संगतिं दर्शयितुमाह पूर्वेति प्राधान्येन लिङ्गादिषु शीघ्रप्रवृत्ततया तदुपजीव्यतया च तयोः एतदेव प्रथम
निरूपणोऽश्रुतिपाद इति व्यपदेशे च हेतुः तेन पूर्वपादे लिङ्गादिविनियोगविचारेऽपि न क्षतिः प्राधान्येन व्य
पदेशादित्याशयात् अधुनेयमनन्तरमपि प्राधान्येनेमनुवर्तनीयं तथा लिङ्गादिषु लिङ्गप्राधान्याद्वाक्या
दिभ्यः पूर्वमुपजीव्यकत्वेन चाश्रुतिविनियोगानन्तरं लिङ्गाविनियोगोऽस्मिन्पादे विचार्यत इति पादभेदः
संगतिश्चेत्यर्थः ननु लिङ्गविनियोगसामान्यतो नाभिधायकत्वं तद्विशेषश्चिन्तनमत आह विनियोजक
त्वं चेति लिङ्गस्य मन्त्रगतार्थप्रकाशनसामर्थ्यस्य सामर्थ्यमिति विनियोज्यगतं दृष्टोपकारसामर्थ्य
मित्यर्थः तत्र मन्त्रगतं मन्त्राधिकरणे दर्शितं स्तवाद्यर्थगतं तु इतः द्व्यावदानसामर्थ्यं अर्थाद्वेति प्र

शा॰द्री
१८

यमाख्यायां सूत्रे दर्शितमिति ज्ञेयं। चकारोऽप्यर्थः। शब्दादेवेति। एवकारेण गौणलाक्षणिकयोर्निरासः। अ
विशेषादित्यहेतोरसिद्धिमाह। विशेषेति। अक्षादिवज्ज्ञानार्थत्वशंकामपाकरोति। गुणादेवेति। गुणशब्दस्यात्र
साहचर्यप्रयोजक क्रियादिसाधारणधर्ममात्रपरः येषामिति। तार्किकादय इत्यर्थः। सामान्येति। पैङ्गल्यत्वादिनेत्यर्थः
। तथा चाग्निगतगुणज्ञातीयगुणवत्त्वं गौण्या वृत्तिरिति भावः। शक्तितः सामर्थ्यान्मंत्राणामुभयार्थतेत्यन्वयः। गुणा
नां अग्नानां। लोकं व्याचष्टे उभयेषामिति। मुख्यगौणरूपाणामित्यर्थः। यथाकथंचित्। साक्षाद्गुणद्वारा च। एवं स
ति गौणोऽ इति। गौणार्थविषय इत्यर्थः। कार्यभेदेपि न फलभेद इत्याह। साक्षादिति। अभिधानस्य। अभिधानानुकू
लव्यापारस्य शक्तिरूपस्य। सिद्धांतमाह। गौणोऽ इति। गौणार्थविषय इत्यर्थः। सदपि। स्वरूपतो विद्यमानमपि। सा
मर्थ्यं। गौणार्थविषयप्रकाशनयोग्यतारूपं। प्रमाणांतरात् मुख्यान्वयानुपपदसामानाधिकरण्यवाचनिकवि
योगादिरूपात्। आविर्भवति। ज्ञायते। शब्दादेव। शब्दश्रवणादेव आविरस्ति। ज्ञायते। शब्दसामर्थ्यं च ज्ञातमनोप
स युज्यते न स्वरूपादिति भावः। ननु गौणार्थतात्पर्यग्रहादेव किंचित्सर्वं गृहीतस्य गौणसामर्थ्यस्योद्बोधः स्यादित्य १५
शंक्याह। तात्पर्येति। स्वतः श्रवणादेव। प्रमाणांतरेति। पूर्वोक्तेत्यर्थः। मुख्योऽर्थः पूषदेवतारूपः। प्रकरणो द

र्शप्रकरणे उत्कर्षः दर्शप्रकरणादाकृष्य पूषणो गांगत्वं न संभवतीति अनुमंत्रणासमाख्यावत्सामान्यसंबंध
बोधकप्रमाणाद्यभावादिति भावः ननु मंत्रस्य प्रयोजनाकांक्षा पदार्थानां च स्मारकाकांक्षे उभयाकांक्षावशे
न मंत्रोपयुक्तपूषा प्रकाशकत्वं तत्प्रकाशयेदिति श्रुतिकल्पनावशेन गौणसामर्थ्यस्याप्याविर्भावादुभयत्र विनि
योगः स्यादत आह अपि चेति तथा चान्यतराकांक्षापि नास्ति दूरादुभयाकांक्षेत्यर्थः तर्हि मुख्यस्यापि प्रकारां
तरेणास्मृतिसिद्धेर्मंत्राकांक्षाभावात्तत्रापि विनियोगो न स्यादित्याशंक्याह मुख्येति प्रयोजनं विकृतौ मंत्राणामूह
सिद्धांते पूर्वपक्षे नेति सूत्रार्थस्तु अर्थाभिधानरूपद्वारसंयोगात् मंत्रेषु शेषभावः कर्मांगत्वं तस्मादुपस्थितिसंबंधः औ
त्पत्तिकेन स्वभावसिद्धेन मुख्यार्थेनैव संबंधस्तेनार्थेन नित्यसंयोगादिति॥ ॥वचनात्॥ ॥लिंगपादे कथं आ न
विनियोगचिंतेत्याशंक्याह अपवाद इति मुख्य एव विनियोग इत्यस्यायमर्थः अग्नेश्चयने निवेशन इति वि
श्वारूपाभिचष्टे शचीभिः देव इव सविता सत्यधर्मेंद्रो न तस्थौ समरे वसूनामिति मंत्रशेषः मुख्यस्येति सावधा
रणा मुख्यस्यैवेत्यर्थः पूर्वाधिकरणोक्तत्वेव सिद्धांतात् अस्य च तदपवादत्वेन तत्सिद्धांतस्य पूर्वपक्षकोटिमा
तः पर्याप्तत्वस्य प्रवृत्ततत्सिद्धांतकोट्यविरुद्धत्वात् न च गौणस्यैवेति सिद्धांतकोटिरिति वाच्यं मुख्यव्यवच्छेदारा

शा. दी.
१९

19

स्यवत्त्वावत्त्वाधिकरणातिषयत्वस्य पौनरुक्त्यपरिहारावसरे वक्ष्यमाणत्वेन तस्यात्राविवक्षणात् ।न्यायादिति
तात्पर्यग्राहकं विना गौणसामर्थ्याप्रतीतिरूपादित्यर्थः ।ननु विनियोग एव गौणार्थे तात्पर्यग्राहकोऽत आह
विनियोगस्येति ।विनियोगस्य शक्त्यनुसारेणेत्यर्थः ।विनियुज्यतेऽनेनेति विनियोगो गार्हपत्यशब्दः वर्ण्यते गौणया
व्याख्यायते तु शब्देन विनियोगानुसारेण विनियोगस्य शक्तिवर्णनव्यवच्छेदः ।अन्योन्याश्रयापातं तथा हि विनियो
गे योग्यताज्ञानस्य हेतुत्वात् गौणसामर्थ्यरूपयोग्यताज्ञाने सति विनियोगः तस्मिंश्च सति तात्पर्यग्रहात् गौणसाम
र्थ्यप्रतीतिरिति ।तस्मादैन्द्र्येति तद्धितश्रुतिरूपतात्पर्यग्राहकवशात् गार्हपत्यपदमेव गौणया व्याख्येयमित्यर्थः
ःऽन्तराईं व्याचष्टे नखल्विति ।अभिधीयतेऽनेनेत्यभिधानं ।न चानुवादत्वान्मन्त्रस्यैव गौणी प्रक्रान्ता नतु विधौ ।नवि
धौ परशब्दार्थ इति न्यायादित आह तेनेति ।विनियोगस्य गार्हपत्यपदस्यार्थवर्णनेत्यर्थः ।मन्त्रलिङ्गस्योपजीव्य
त्वेन प्राबल्याद्विधेरेवान्यथा नयनमुचितमिति भावः ।तदेव दर्शयति इन्द्रो हीति ।गार्हपत्येनेति शब्दपरं ।अ
थवा गार्हपत्येन साधर्म्यादिति संबन्धः ।साधनेति भावप्रधानं ।न चैन्द्र्येति पदस्य इपदयोगमात्रेणापि संभ
वात् गौणतापातात् तात्पर्यग्राहकत्वमित्यारोक्य मुख्यवृत्त्यैव गार्हपत्यपदेनेन्द्राभिधानमित्याह ।यद्वेति ।यतोय

राम
१९

स्मादयमिं द्रोगृहपतेर्यजमानस्य संबंधी तेन हेतुना अवयवयोगतः यागकर्तृ पदाद्विहिताय पुरुषायावयव
२ त्पत्त्यैराहूपत्यपदवाच्यः स्यादिति योजना रूढिबलीयस्त्वेन योगासंभवाद्गार्हपत्योपि मुख्यप्रातिपादके गौ
णापेक्षया जघन्यवृत्तीयायानक्षरणाप्रवृत्तेरितिभावः सप्तम्यर्थे सामीप्यिकाधारत्वे सर्वतः सप्तमं तस्य पक्षमाह य
द्वेति उपपूर्वस्य तिष्ठतेरभिधानताचकत्वाप्रसिद्धेर्लक्षणांगीकारे च एवं त्वपक्षाद्विशेषाभावेनेराह आत्म
नेपदेति उपान्मंत्रकरणे इत्यात्मनेपदविधिविषयेन समीपस्थितेरवगतस्य मंत्रकरणकत्वस्याभिधानार्थमेव
एवोपपन्नेः समीपस्थाने अभिधानार्थे आत्मनेपदबोधितमंत्रकरणकत्वादिमनुमानादभिधानक्रियाव
गतिरितिभावः एवं पक्षिसंस्कारणायागफलीभूतविनियोगयताजननेन यागांगताव समीपस्थानफलाभिधान
करणास्यापि मंत्रस्य समीपस्थानकरणत्वोपपत्तिरित्याशयः तत्र तयोः क्रिययोर्मध्ये ननु कर्मत्वेन विशेषणत्वा
ताच्या नचासौ संभवति तिष्ठतेरकर्मकत्वादत आह यान्यायेन समयाय उपप्रेति उपसर्गवशेन सामीप्यरूपप
णाशेन सकर्मकत्वविवक्षणात्स्यन्याश्रयत्वेन गार्हपत्यस्यानर्थक्यं तद्गन्यायेन समीपस्थितिक्रियायामेवक
र्मत्वेनान्वय इत्यर्थः सिद्धांतमाह अग्नाविति गार्हपत्य इत्यर्थः एवं योग्यताज्ञानाभावे प्ययोग्यतानिश्चयाभा

शा· दी·
२०
20

वमात्रेणाविनियोगानङ्गत्वेतद्दर्शनपञ्चहोतासामर्थ्यावगमेनान्योन्याश्रयाप्रसक्तेरितिभावः वह्निनामिर्वेदि
सादिवैलक्षण्यमाह नचेति· प्रमाणांतरं मंत्रातिरिक्तं विनियोजकं वचनं· एवंच प्रधानभूताभिधानक्रियापा
मेव गार्हपत्यान्वयसंभवेनानर्थकानङ्गन्यायाभावान्नगुणाभूतोपस्थानान्वय इत्याह· अभिधानेति· अन्वा
र्थेति· अभिधानार्थेत्यर्थः· यत्नायत्नाधिकरणयोन्यत्र निराममा याह· तद्देहेति· सत्त्वे अपयाथार्थ्यमिति क्रियापा
विशेषणातपानपुंसकत्वं प्रयोजनेतुस्पष्टम्॥ ॥तथाह्वाने॥ ॥गौणाविनियोगाय वाह्वादनन्तरसंगतिस्तु चप
न्त्राहतत्रेति· गौणोइति· हविः कर्त्र्यापत्न्या मुख्यः अवधानेनु हविःसाधनत्वसाम्याद्गौणइत्यर्थः· तल्लक्षणा·
अवघातकालल्लक्षणा· कपालिमपनंतरे संगच्छतइति शेषः· तदस्योक्तं शंकासमाधानं शंकितेनैव दूषयति·
प्राप्तेति· मंत्रस्येमनंतरं तदुद्देशेनेति शेषः· यथाश्रुतेनैव घातोद्देशेन त्रिरभ्यासविधेः फलीभूतत्वेन दूष्य वि
रोधेनासंभवात् एवं पक्षाशंकासमाधानमाह· पात्रेति· नचाहूपत्नीत्यचेतनेनानुपपन्नमत आह· शकोवा
रणेति· आह्वानकर्तृत्वं चेतनकर्तृप्येप्येहीति शब्दोच्चारणवाग्निमित्तसाम्यादित्यर्थः· यतोयस्मात्तु किंचिच्छब्दोच्चा
विशेषमंत्रोहि· यज्ञातेकु विद्वत्सहितइत्यन्वयः· अयं· त्रिरभ्यासः· निमित्तान्वयीति· निमित्तान्वयबोधविशेषादि राम

२·

त्यर्थः तस्मात् नित्यप्राप्त्यभावात् लक्षणार्थेन लक्षणेति प्रयोगः अर्थप्राप्यत्वादिप्यत्राक्रान्तस्येत्यादिः प्रकरणापः ए
वं तावच्छ्रौतविनियोगत्वमभ्युपेत्योक्तं वस्तुतस्तु तद्वेतासिद्धमित्याह अपि चेति लिंगतिरोधमेव प्रपंचयति न
त्वाल्विति आक्रान्तमाक्रान्तमंत्रस्तथा अपथार्थमिति सूत्रार्थः प्रयोगतं स्पष्टम् ॥ ॥तथोत्थान॥ ॥अतिदेशिकीं
संगतिं दर्शयति पूर्ववदिति आद्यस्योत्थाने द्वितीयस्य च वाग्विसर्गे विनियोग उतोत्थानकाले पूर्वमंत्रो द्वितीय
मंत्रकाले च वाग्विसर्गः विनियोगः लिंगाद् अग्निविहरणप्रैषेत्युत्तरकरणप्रैषे चेमेत्वमित्यर्थः तद्देवप्रक्रमिति ए
वं चाध्वर्युरुत्थानमेवाग्नीध्रवद्देनोच्यते आमंत्रणविभक्तिरपि चेतन्यारोपात् एवं विस्तृनामानावागेव व्रतमध्वरा
कर्तृत्वे नोपचाराद्व्रतिपाद्यत इति भावः उत्थानविसर्जनेन तथामंत्रांगिभूते इति सूत्रार्थः ॥ ॥सूक्तवाके॥ ॥इहका
नार्थसंबंधापवादादनंतरसंगतिः कृतार्थत्वात् स्वर्गफलत्वत्वात् इष्टेति यागसंबंधीत्यर्थः नानेति स्नुग्व्यार
णादीत्यर्थः निर्णीतेति अनूयाजांगयाजानंतरयावादनूयाजानंतरकालस्तस्य निर्णीत इत्यर्थः प्रहरणानु ब
र्हिष प्रस्तरासादनानंतरं विहितमपि न तद्दैव शक्यकर्तृ स्नुग्व्यारणादिकार्याणिष्पत्तेरतो न निर्णीतकालमि
ति भावः ननु काललक्षकत्वे ततीयानुपपत्तिरत आह ततीया चेति तथा च सूक्तवाकोपलक्षितप्रहरणाक्रि

येनिबोधः उपलक्षणत्वं चसमानकालीनत्वमित्यर्थः कारकविभक्तिबलवत्त्वमाशंक्याह नहीति सिद्धांतमाह श्र
येति अयोग्यतानिश्चयाभावेन शीघ्रप्रवृत्तत्वाद्यायोग्यताकरणत्वबोधे तदन्यथानुपपत्त्या सूक्तवाकप्रकरणा
म्नायादिदेवतासंबंधस्यप्रहरणेकल्पनाच्चकेवलप्रक्षेपरूपतातस्याकिंतुहोमरूपता यथाइंद्रऊर्ध्वोऽध्वर
इत्याघारमाघारयतीत्याघारणस्येत्यर्थः एषइति होमशब्दाभिप्रायं पुंस्त्वं सर्वो हीति सकलपदार्था
न्वयः क्रियाद्वारकएवेत्यर्थः लक्षणक्रियेति ननु प्रहरणाभावनागर्भः अकारकत्वेन साक्षात्तदन्वयाभा
वादित्यर्थः अस्तु तर्हि लक्षणक्रियाद्वारैव प्रहरणक्रियाचपरत्वनाह नत्वेहेति उपात्ताः शब्दवाच्याः
अपेक्ष्य लक्षइत्वा नचेत्थंभूतलक्षणात्वीयमनुशासनाल्लक्षणक्रियायाः फलतायावाच्यत्वशंकां ला
व क्षणिकत्वेन तदुपपत्तेर्नैकार्थत्वकल्पनानुपपत्तेरिति भावः संस्कारार्थइति उद्देशांशेनस्मरणारूपसंस्का
रार्थइत्यर्थः प्रयोजनं पूर्वपक्षे सूक्तवाकसमकालं प्रहरणं सिद्धांतेत्वं तइत्यादि सूत्रं स्पष्टार्थम् ॥ ॥क्र
त्वोपदेशात् ॥ ॥उपजीवकत्वसंगतिप्रदर्शनार्थमाह प्रहरणांगमिति इष्टेति पौर्णमास्यांइष्टायां देवता राम
त्वप्रकाशकभागस्यतत्रप्रयोगः एवममावास्यायामिति विभागइत्यर्थः समस्तेति इदंद्यावापृथिवीभद्र २१

मन्त्रादिसारभ्यनमोदेवेभ्यइत्यंतोस्यार्थः नन्वाग्नेपादीनांसहितानांफलाच्चयस्यसहितानामेवेतिकर्तव्यता
कांक्षेतिसूक्तवाक्यस्यविभागेनतद्गतत्वस्यानुप्राप्तः प्राप्तराशीपोदपनीययोरेकादशिनानाम्नमेरन्निसमत्रपंचप्रापरा
पेपरावः षडुदपनीयइतिविभागवदित्याशंक्याह अग्राग्नेपादिनीति उपसनोपृथक्करणात्वावगमात् फल
वाक्यैककरणानांद्वंद्वेनेकपदोपादानेनचसाहित्यावगमोनतुसहितानांकरणानेतिप्रत्येकमेवांगाकां
क्षेत्यर्थः प्राप्तराशीपोदपनीयपोस्कप्राप्तैकादशिनोद्देशेनदेशरूपतपाविधीयमानत्वात्साहित्यविव
क्षाइह त्वाग्नेपादीनामंगविधानुद्देश्यत्वान्नतदुतसाहित्यविवक्षेतिवैषम्यमितिभावः लिंगविरोधमा
शंकते नन्विति ऐंद्राग्न्यापेनलिंगबाधइतिसमाधत्ते नैवमिति सूक्तमिति सुप्तुश्राप्यभागादिषु उक्त
निर्दिष्टमग्न्यादिकमित्यर्थः तथाचैकप्रयोगहविःपावद्देवताप्रकाशकपदसमुदायविशेषेसाधारणोय
दोपेसूक्तवाकशब्द इतिवचनस्यलिंगोपोद्बलकत्वमेव नतुतद्बाधकत्वमितिभावः निष्कर्षो विभागः सू
त्रप्रयोजनेस्पष्टे॥ ॥लिंगक्रमः॥ ॥पूर्वत्रक्रतेदुर्बललिंगानुसारित्वेनसमस्तलिंगस्यापिदुर्बलक्रमानुसा
रित्वमिहचिंत्यतइतिप्रसंगसंगतिः इंद्राग्न्यादिलिंगमंत्रप्रकाश्यचिह्नपासूताइत्यर्थः क्रमेण पाक

मेण॰ व्यापारविशेषेति॰ द्वारन्तरोपकारविशेषमात्रेइदमर्थः॰ तएवेति॰ प्रयोजनापेक्षासहकृतल्लिंगादेवे
त्यर्थः॰ तद्धं॰ लिंगं च॰ साधनरूपेति॰ साधनस्वरूपेत्यर्थः॰ ननुप्रषाप्रापिषभाऽऽइमत्रसंबंधीकर्मापूर्वदर्शि
नवगमेपिप्रस्त॰ पिषड्व्यस्यच स्वरूपतःसंबंधमात्रेणापर्यवसानमत आह॰ पूर्वेति॰ तथाचवाक्यादे
वतत्रपमापूर्वसंबंधावगमइतिभावः॰ ननुपरस्परतामपीत्युक्तंभवतीत्यनारभ्याधीतवाक्येनक्रत्वव्य
भिचारिग्रहादेशेनपरीतताविधिवत्तथा नधा भूताग्न्यादिप्रकाशनल्लिंगादपिप्रमाणांतरं विनापि
विनियोगः स्यादित्याशंक्याह॰ नचेति॰ ग्रहाः क्रतोरन्यत्रेनसंबंधप्रसिद्धिः॰ अग्न्यादेस्तुपाकदाहा
दिलौकिकक्रियास्वपिसंबंधप्रसिद्धेर्नक्रत्वव्यभिचारइत्यर्थः॰ इंद्रादेरलौकिकत्वादाहइंद्र इति॰ यथा
वेदात्क्रतुसंबंधस्तथामेवादिस्थानगतत्वदेवनिपतवादिसंबंधोपिप्रसिद्धइतिनक्रत्वव्यभि
चारइत्यर्थः॰ मंत्रकांडस्यपनेनतंक्रतुसंबंधइतिशेषः॰ एकांततोनियमतः॰ एकांत इति॰ अपेक्षानियम
इत्यर्थः॰ सोपरापिकेति॰ पारलौकिकेत्यर्थः॰ देहातिरिक्तात्मातानेतत्वापत्तैरितिभावः॰ पथ्याक्रममपि ति
प्रथममपवितापामिष्टो॰ प्रथममपवितपा,त्यानुवाक्यापुगनमेगं द्वितीयपत्वानपवितापांद्वितीयपत्वा

नपठितत्वात्प्रमाणवाक्यानुगतमिति क्रमानुसारेणसामर्थ्यः संभवतां प्रधानदेवताप्रकाशकानां असंभवतां·
तदप्रकाशकानां नास्त्येवेति· तास्त्वेवैषु पुषा· सामिधेन्यस्तादाद्दविमर्थ्यः अनर्थक्यात्तदंगेष्विति न्यायादितिभा
वः समाम्नानं मंत्रकांडे लिंगक्रमसहितसमाख्यानात् काम्यप्रयुक्तं काम्येष्टियागमिति सूत्रार्थः प्रयोजनं तु स्पष्टं ॥
॥ अधिकारे३ ॥ ॥ क्रमस्य पूर्वसंबन्धबोधकप्रमाणस्य लिंगसहायत्वमिव क्रमलिंगसहायत्वमपि प्रसंगादुच्य
त इति संगतिः असंपृक्ता इति· द्वारविशेषेणासंबद्धा इत्यर्थः एतच्च क्रमपूर्वसंबंधक्लृप्तेः सिद्धान्तोपयोगितया
सूचनायोक्तं लोचाद्दो चेति पूर्वपक्षोपयोगितयोक्तं प्रदेशान्तर इति च सन्निहितत्वव्यावर्तनेन पूर्वपक्षोपप
त्त्यर्थमेव· आग्नेय्येति आग्नीध्रशब्दे नाग्नीध्रस्थानमर्थः उपस्थसंस्कारत्वेनाग्नेयीकरणकोपस्थानमंत्रो विधीयते· न
साधनभूताः स्वरूपमात्रे आनर्थक्यादपूर्वसाधनभूतानाः उपादीयते उपस्थानार्थत्वेन विधीयते· सन्निधा
नादिति· राजसूये न स्वाराज्यकामो यजेतेत्यादौ प्रकृतयागोपादाननियमादितिभावः एवमपीतरापेक्षयापि प्र व
कृतानां संनिधानमस्त्येवेत्यत आह· अस्त्वेवेति· राजसूयवाक्ये हि प्रकृतयागानां फलसाकांक्षत्वादुपादानेन
विहतत्वेति भावः एतदेव लौकिकोदाहरणप्रदर्शनेन व्युत्पादयति· पथ्येति· बाधितेति· संकोचनलक्षणाबाध

पुत्रास्यादित्यर्थः दुर्बलं प्रमाणं नहि प्रबलप्रमाणस्यापेक्षितस्य संकोचः क्रियते तेनानपेक्षित इति न्यायस्य सर्व
त्रोपगमादिति भावः प्रौगिकत्वादिति सामान्यदेवतेति सर्वनामार्थ विहितत्वात्तद्धितान्तत्वादित्यर्थः अग्निदेवतासं
बंधित्वेनैव व्यक्तिप्रतीतेः संनिहितत्वाद्दूरबोधाद्वा नैवमिमाह नैवमिति कथं तर्हि व्यक्तिविशेषलाभस्तत्राह प्र
माणांतरेति आमिक्षादिपदसमभिव्याहारेत्यर्थः सतीपरीति अपिनाभ्युपेत्यवादत्वसूचनं अन्यार्थेन
त्वोच्चार्थत्वेन अभ्युपेत्यवादत्वं प्रकटयति नचेति सिद्धांतमाह प्रकृताश्च वेति प्रकृतानां हि प्रकरणो
न क्रत्वपूर्वसंबंधावगमात्किं द्वारेणेति द्वारविशेषमात्रापेक्षायां आग्नीध्रोपस्थानरूपद्वारविशेषमा
त्रबोधनेनालाघवं तावतैवोपस्थानस्यापूर्वसाधनरूपत्वस्य सिद्धेः नहि क्रतुसाधनं क्रतुसाधनद्वारं
संभवतीति अप्रकृतानां तु क्रतुसंबंधासिद्धेः क्रत्वपूर्वसाधनीभूतोपस्थानरूपव्यापारबोधने उ
पस्थानरूपतत्क्रत्वपूर्वसाधनरूपताच व्यापारस्य बोधनीयेति गौरवमित्यर्थः एतदेव विवृणोति
आग्नीध्रोपस्थानस्येत्यादिना ज्योतिष्टोमापूर्वसाधनस्य पादनस्योपायिकं रूपाय इत्यर्थः ज्योति राम
ष्टोमगत इति ज्योतिष्टोमापूर्वसाधनीभूत इत्यर्थः ननु व्रीहीन् चहतीत्यादौ पश्यावघातरूपता २३

दर्शपूर्णमासापूर्वसाधनतावच्छेदनताच बोध्यते तथाप्यव्यापीति शंकते नन्विति · आदिनाप्रोक्षणादिसं
ग्रहः · अवहननीयादावपि प्रकरणेन क्रतिकल्पनादस्त्येव कल्पनागौरवमित्याह · समानमिति · प्रकृतेपि
तर्हि तथैवेत्याशंक्याह नचेति · नकेवलं प्रकरणेन क्रतिकल्पनागौरवमात्रं किं त्वन्यदपीत्याह तथे
ति · संबंधेति · क्रतुसंबंधबोधकत्वादित्यर्थः · एतदपि गौरवमवहननीयादिष्वस्त्येवेति दर्शपतीति · पर्यंतेति · कि
मिति तर्हि तत्र कल्पनागौरवाभ्युपगमनमित्याशंक्याह तदिदमिति · अवधारित इति · प्रकरणपाठानु
मितवाक्येनेति भावः · इह · अस्मिन्वाक्ये · उक्तन्यायस्य सामान्यमिकाधिकरणाविरोधं शंकते नन्विति ·
उपनिधाय · स्तोत्रदेशसमीपे स्थापयित्वा · उक्तन्यायस्य तत्र प्रसक्तत्वचनेनापत्तनात् बहिर्निर्गमेद
षप्रायश्चित्तबोधकेन बाध इति समाधत्ते नैष दोष इति · आह स्मेति · विशेषत इत्यर्थः · दोषबोधकं वच
नमाह · विवाद इति · वीतोपसर्गस्य श्रुयत इत्यनेनान्वयः · इदि पदार्थं समन्वयरहितो भवतीत्यर्थः · वैमि
स्त्वपे · अपक्षपति · आपतनाद्बहिर्निर्गच्छतीत्यादिपदेन प्रायश्चित्तवाक्यमुपलक्ष्यते · तं संभरेदि
दं तस्य कर्मेत्यादि · ननु स्वविशेषोपादानेन शीघ्रप्रवृत्तस्तोत्रादिकार्यविशेषबोधकेन विधिना

नैराकांक्ष्यात्कथं प्रकृतग्रहणाभिप्रायेण शंकते· नन्विति· लाघवापेतद्विध्यपेक्षावशान्निराकांक्षाणाम
पि प्रकृतानामाकांक्षोत्थापनादुपस्थानसंबंधोपपत्तिरित्यभिप्रायेण समाधत्ते· सत्यमिति· नन्वेवमपि एक विशे
षान्वितस्यापरविशेषान्वयेपि विनियुक्तविनियोगविरोधो नैराकांक्ष्यं च समाशंक्याह· विशेषरूपत्वेति· पुरोडाशक
पालेनेत्यादौ विनियुक्तस्य वा चकशब्दोपादानेपि अधिष्ठानत्वक्षणया विरोधः परिह्रियते· किमुतात्र तादृशशब्दा
भाव इति भावः· प्रसंगप्राप्ताशंकामपाकरोति· पूर्वमिति· अधिकारे प्रकरणे मंत्रविधिः· प्रतिद्वारव्येषु· अप्रकृतमंत्रे
ष्वपि· शिष्टत्वात्सामान्यशब्देन विधानादिति पूर्वपक्षसूत्रार्थः॥ ॥लिंगसमाख्याभ्यां॥ ॥ भक्षेति· सोमशेष
भक्षे मंत्रः· आदिपदेन· दीर्घायुत्वाय शंतनुत्वाय रायस्पोषाय सुप्रजास्त्वाय एहि वसो पुरोवसो प्रियो मे हृदोस्य
श्विनोस्त्वा बाहुभ्यां सघ्यासं· नृचक्षसं त्वा देव सोम सुचक्षा अवख्येषं· हिन्व मे गात्रा हरिवो गणान्मे मा वितीतृ
षः· शिवो मे सप्तर्षीनुपतिष्ठस्व मा मे वाङ्नाभिमतिगाः· मंद्राभिभूतिः केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु
·वसुमद्गणस्य रुद्रवद्गणस्यादित्यवद्गणस्य सोम देव ते मतिविदः प्रातःसवनस्य माध्यंदिनस्य सवन
स्य तृतीयसवनस्य गायत्रच्छंदसस्त्रिष्टुप्छंदसो जगच्छंदसोग्निहुत इंद्रपीतस्य नराशंसपीतस्य पितृपी

तस्य मधुमत उपहूतस्योपहूतो भक्षयामीति मंत्रशेषसंग्रहः । सिद्धांतकोटिसिद्ध्यर्थं मंत्रार्थानभिमतत्वदर्शी
यति कश्चिदिति । मंद्रेत्यादि रत्नभागस्त्व मपि फलकभक्षणप्रकाशक इत्यर्थः । अन्य इति । भक्षेत्यादिः मे घ्रास
मित्यंतो ग्रहणस्य । नृचक्षसमित्यादिरवख्येषमित्यंतोऽवेक्षणस्य । हिन्वेत्यादिरतिगा इत्यंतः सम्यक्जरणस्य
प्रकाशक इत्यर्थः । मंत्रार्थस्तु हे भक्ष एहि मां विश प्रविश । किमर्थं तत्राह दीर्घायुत्वाय तथा शंतनुत्वाय सुखदेह
त्वाय तथा रायस्पोषाय वर्चसे तेजसे सुप्रजास्त्वाय शुभसंतानत्वाय हे वसो निवासहेतो पुरोवसो । निवासहेतुषु अ
ग्रगण्य एहि । मे मम हृदो हृदयस्य प्रियोऽसि । त्वा इति त्वां अश्विनोर्देवभिषजोर्हे त्वा बाहुभ्यां सघ्यासं गृह्णामि । वैद्यहस्त
गृहीतस्य हितकारित्वात् । हे देवरूप सोम नृचक्षसं नॄन्चष्टे पश्यतीति तादृशं । न सुचख्या पत इति वा प्रसिद्धं त्वां सुच
क्षाः श्रेमनो दृष्टाहम् अवख्येषं अवेक्षे । हे हरिवः हरितवर्ण सोम मम मे गात्राणि हिन्व प्रीणय । मे गणान् पुत्रादीन्
इंद्रियाणि वा मा वितीतृषः तृषापानवत् मा रहितान् मा कुरु । शिवः कल्याणरूपः सन् मे सप्तर्षीन् चक्षुर्नासिकाश्रो
त्रद्वंद्वगताः षट् आस्यगत एक इति सप्त प्राणान् उपतिष्ठस्व भजस्व । मेवाङ् नाभिं चातिक्रम्य मा गा इति वम
न विरेचन प्रतिषेधः । मंद्रा हर्षहेतुः अभिभूतिः विघ्नाभिभवकर्त्री । यज्ञानां केतुः प्रकाशिका वाक् सो

शा·द्दी
२५

मस्य तु षाणां सोमं सोमं सेवमानाः तृप्यतु अष्टसंख्यवसुमानगणोपस्य· एतमेकादशाह द्रवानद्वादशादित्यवां
श्वगणोपस्यतद्गुणागतस्येत्यर्थः हे सोम देवमतिविदः अन्नद्वापुरूपजमानबुद्धिवेत्तुस्तव कीदृशस्य प्रातःसवना
दित्रयसंबंधिनः सवनत्रयस्य कीदृशस्य· क्रमात गायत्र्यादिछंदोपुरूपस्य अग्नेरुपते अत्रताहशस्य· तथेंद्रेण
पीतः सोमोपत्रताहशस्य· नरैःशस्यंत इति नराशंसाः पितरविशेषास्तैः पीतः सोमोपत्रताहशस्य· अपमेवार्थः पि
तृपीतस्येत्यनेनस्पष्टीकृतः पुनः कीदृशस्यसोमस्यमधुमतः तद्धतास्वाद्यस्य· उपहूतस्य· उपहूत अनुज्ञातोहं
तवशेषं अर्थात· भक्षयामीति· वसुमद्गणादेर्यथाक्रमं प्रातःसवनादिनान्वयमाहुः॥ विभज्येति· तत्रदर्शानु
ष्ठानेतत्र द्वागस्यांगत्वमित्यर्थः अथ प्राप्तेषिति· अनवेक्षितस्य ग्रहणापोगाद्गृहीतस्यच भक्षणापोगा
द्भक्षणाविधितस्वार्थात्रयोः प्राप्तिः तप्तिसम्यकुग्रहणापोक्तभक्षानुनिष्पादितयार्थप्राप्तिरिति· सर्वस्येति· मं
त्रस्येतिशेषः अचोदनात्· अविधानात्· ततः किंतत्राह ग्रकत्वर्थ इति· क्रत्वनंगभूतोग्रहणादिर्मंत्रस्यक्रत्वंग
तापाद्वारीभवितुनार्हतीत्यर्थः तथाचग्रहणादिप्रकाशनद्वाराक्रत्वंगतामंत्रस्यानुपपन्नेत्यर्थः एवंचक्रतुसं
बंधाभावादग्रेपीक्ष्कतिस्वारस्यभंगवदिहलिंगस्वारस्यभंगइतिपूर्वपक्षकरणाद्वान्तिदेशिकीसंगतिर्बोध्या· ग्र राम
हणागत्वासंभवमात्रेणकथंभक्षणागत्वमतआह· भक्ष्येति· सर्वस्येत्यनुषज्यते संता· समाख्यातयाहिसकं २५

त्वस्य भक्षप्रकाशकत्वमवगम्यते एकदेशस्य तदङ्गीकारे च तदसामञ्जस्यापत्तिरिति भावः ननु सकलमंत्रस्य भक्ष
प्रकाशकत्वात्कथं समाख्याकथं वा न पातिनियोगस्तत्राह सामर्थ्यं चेति भक्षणे भक्षणप्रकाशने तद्विशेषणादि
ति भाते इत्यत्र तस्य भक्षणस्य विशेषणात् ग्रहणाद्यर्थोपरक्ततया बोधनात् सवितृप्रादिति देवस्य त्वा सवितुः प्र
सवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति मंत्रगतसवितृप्रादिपदानामिव विशिष्टनिर्वापप्रका
शनेन सामर्थ्यमित्यर्थः लक्षणायेति गृहीत्वा समयगतरणायेति का चतुर्थ्यर्थलक्षणायेत्यर्थः वाक्यवशेनः भ
क्षे हि भक्षयामीत्युपक्रमोपसंहारयोरेकविषयत्ववशादेकवाक्यतावशेन ऊर्ध्वकालेनितरणाभिप्राये विशि
ष्टप्रकाशने विवक्षितोति गृहीत्वेति उपपन्नतरेति अन्यथा एकदेशसंबंधाभिप्रायेऽसमञ्जसमास्यादिति भावः वा
क्यसमाख्ययोर्लिङ्गाद्दुर्बलत्वात् बाधेन स्योनं ते मंत्रवद्विभज्य विनियोग इति सिद्धांतयति ग्रहणादाविति नेशा
ते न समर्थं वमतः यदुक्तं ग्रहणादेर्विहितत्वेनानंगत्वात् प्रकाशनानर्थक्यमिति तत्परिहरति ग्रहणादि चेति
साक्षात्प्रत्यक्षेण शास्त्रेण मन्त्रप्रचोदितार्थेन विहितभक्षार्थत्वेन तथा च भक्षविध्यन्यथानुपपत्त्या कल्पि
तेन विधिना ग्रहणादेरपि विधिरित्यर्थः ननु गृहीत्वापि भक्षणासंभवान्न ग्रहणस्य निपतकारणामिति तत्सू

शा.दी
२६

काशकमंत्रत्वानिपमत्वानुपपत्तिरत आह भक्षेति · ऐंद्रवापवं भक्षपतीत्यादि भक्षविध्येकवाक्यतपा मंत्रवर्णोविशे
नवाहुभ्यां गृहीतस्याचेक्ष्यसम्यग्जरणायेतिपदकल्पनपा निपमविधिस्वीकारात्तन्निपमानिपमानिपमसंपोग · वि
रोधइत्याशपः नप्रमत्तइति · अदृष्टार्थतापत्तेरितिभावः सम्यक्जरणस्य कृतिसाध्यत्वेनाननुष्ठेपस्यस्मारकानपे
क्षणात्कथंमंत्रप्रकाशपतेत्याशंक्याह सम्यगिति · स्वरतः सदृष्टार्थत्वात · एवकारेणावमनविरेकपोर्दोषप्रापश्चि
त्तामूलानंसूचितं स्वतः कृतिसाध्यत्वेपि तदनुकूलव्यापारद्वाराकृतिसाध्यत्वान्नानुपपत्तिरित्याह तत्त्विति · प्रपोजनपू
र्वपक्षेग्रहणाद्देरनैपत्यं · सिद्धांतेतुनिपतत्वमित्याद्भूप्तयं ॥ ॥ गुणाभिधानात ॥ ॥ सम्यग्जरणावगमेरपिलिंगान्मं
त्रादिरप्यत्वं तेनप्रकाशपताप्राप्तापोधतइत्यापवादिकीसंगतिरितिसूचपन्नाह · मद्वेति · नव्यापारांतरेति · त
स्यनुकूलबहुभक्षणारूपव्यापारस्याल्पंभक्षपतीमनेनानिषेधात्सम्यग्जरणान्पा[illegible]इत्यर्थः · अतएवनतत्प्र
फलत्वमपिपेनस्वर्गस्यागमस्तुवदित्यादि मंत्रप्रकाशपत्ववदस्याप्युद्भवेत · सोमप्रतिपत्तेरेवफलत्वेनतत्प्रतः फ
लत्वस्यासंभवाच्च · किंचस्वर्गस्यादृष्टफलत्वात्तन्निश्चपरूपश्रद्धोपादनार्थंमंत्रापेक्षा · इहतुदृष्टत्वान्नतद
पेक्षेतिवैषम्यमित्याशपः सत्रार्थीसूक्तः · गुणस्यभक्षविशेषणीभूतस्यारुच्यस्याभिधानान्मंत्रादिभक्षपा राम
२६

ष्यंतस्यैकएवमंत्रःस्यात्कुतःतयोर्भागयोर्विशिष्टार्थप्रतिपादकत्वादिति॥ ॥लिंगविशेषनिर्देशात्॥ ॥भक्षमंत्र
स्यलिंगंकिंसर्वत्रभक्षेऽन्यत्रक्वचिदितिप्रसंगाद्विमृश्यतद्दर्शयति भक्षेति प्रदानानि यागाः ऊहेन इंद्रपदस्यानेमि
त्रावरुणादिपदपाठरूपेण तद्दर्थवेति ऊहानूहपक्षसिद्ध्यर्थमिममर्थः प्रकृतिविकारभावेऽप्यतिदेशप्राप्तस्यविकृ
तावूहः स्यात्तदभावे तु प्रकृतौ यत्र सामर्थ्यं तत्रैव मंत्रः अन्यत्रामंत्रकंभक्षणं सर्वत्रसामर्थ्ये सर्वत्र समंत्रकं
वेति स्यादिति भावः तथेदमिति तत्पुरुषे ऊहामंत्रकपक्षौ बहुव्रीहौ तु सर्वेषां समंत्रकंभक्षणमिति पक्षसि
द्धिः आद्यपक्षमुपपादयति तत्रेति स्वार्थेन्नामः कापीत्यपि प्रधानभूतार्थाभिधानन्नामः द्वयोः पूर्वोत्त
रपदयोः अन्यपरत्वात् स्वार्थाभिधानार्थपरत्वात् एवंसिद्धांतपक्षंनिराकृत्योहपक्षंनिराकर्तुमाह ऐंद्रेति
अंशाभ्यासः तथा वांशत्वेन तुल्यत्वान्नप्रकृतिविकारभाव इति भावः तर्हि अंशाप्रकृतित्वेंऽशाविकृतयः स
न्त्विति शंकामपाकरोति नवा नैवेति अंशव्यतिरिक्तस्यांशिनोऽभावादित्यर्थः तुल्यत्वेनप्रकृतिविकृतिभावा
संभवमुक्तंनिरस्यति मानेति इंद्रापत्वाव त्वघ्नइत्यादिर्मानमंत्रः मानंदशामुष्टीर्मिमीतइति तथा चैंद्रलिंगान्मं
त्रस्यतत्प्रकाश्यसोमग्रहणादिकमपींद्रयागविषयमेवेति सोमसंस्कारादिसकलेतिकर्तव्यतायोगादैं
त

द्रव्यप्रदानंप्रकृतिरितिभावः आहिताग्नेरिति· वसंतेब्राह्मणोग्नीनादधीतग्रीष्मेराजन्यःशरदिवैश्य इतित्रैवर्णिकवि
षयत्वमित्यर्थः· चोदकेन· एककर्मणोत्वत्प्रसादरूपकल्पितेनातिदेशेन· उपहूतवतइति· प्रकृतावितिशेषः· का
र्यं· देवताविशिष्टभक्षप्रकाशनरूपंप्रयोजनं· विकारः ऊहः· अंतराचिंतांतरकारणोसंगतिस्त्वाभरूपंबीजमाह· त
त्प्रसंगादिति· सूत्रमममंत्रकत्वपक्षसाधकंस्पष्टार्थं· ॥ ॥पुनरभ्युन्नीतेषु॥ ॥पुनरभ्युन्नीतेष्विमुदाहरणार्थंदर्श
यति· सवनेत्रिसवनसंबंधिचमसेषुप्रथमंऊपमानानांनवसवनमुखीयाइन्द्रदेवत्यास्तेषुचपंचचमसामै
त्रावरुणब्राह्मणाच्छंसिनेष्टृपोत्राग्नीध्रसहोत्रकसंबंधिनस्तेषुइंद्रायहुतेषुभक्षितेषुवसशेषेषुद्रोणा
कलशात्सोमरसमानीयमित्रावरुणादिदेवतांतरार्थंहुत्वातेषुशेषभूतःसोमरसोभक्ष्यतइत्यर्थः· उपलक्ष
णायः पानकर्तृत्वेननिर्देष्टव्यः· तदर्थंचेति· आद्यपक्षेपूर्वदेवतासंबंधस्याप्यपायान्निर्देशः द्वितीयेनिर्देश
इति· प्रमाणाभावादित्युपलक्षणा· विनियुक्तविनियोगासंभवादित्यपितेपं· सूत्रंस्पष्टम्॥ ॥पात्नीव
तेनुपूर्ववत्॥ ॥शेषाः हुतसोमरसशेषाः आदित्येति· आदित्यस्थाल्यांसंपातमवनयतीतिवचनादि
त्यर्थः ततोपाति· ततीयसवनेआदित्यस्थाल्याआग्रयणास्थाल्यांप्रसायांतीत्यर्थः· पात्नीवतश्चेति· आग्र राम
२७

परागात गच्छते पः सपत्नीवद्देवस्य पागार्थ इत्यर्थः तत्संसृष्टमिति वृक्षात्परां पतन्तीति यथा वृक्षसंसृष्टपरापत
नेपि प्रयुज्यते न तु तद्वपवपरापतनस्य वतद्याज्यापीति भावः प्रकृतौ ऐन्द्र प्रदाने सत्वंस्य षष्ठ्यर्थे॥ ॥त्वष्टा
रन्तु॥ ॥आधपतः अधपु पूपोत्य अग्नाइ इति संबोधने सप्तरिति त्वष्टा देवेन सहेत्यर्थः विनापीति क्रि
यासंबंधं विनापीत्यर्थः सहैवेति दशभिः पुत्रैः सहितत्पायागदेव्यायत्नभारवहनेन्वयोनन्तु पुत्राणां तथेहा पा
त्यर्थः उद्देशेति उद्देशात्त्वष्टुर्थ्यत शब्दनिर्देशः मात्रपदेन तद्व्यतिरिक्त हविर्भागव्यावृत्तिः ननु मंत्रवर्णो रूपा
नस्य देवतासंबंधोपलक्षणात्वं विना निरालंबनत्वापत्ते र्देवता वगमकता भविष्यतीत्याशंक्याह विस्प
ष्टं चेति चोदनापां पात्नीवतग्रहणपतीति विधौ बाधेति मंत्रवर्णोनत्वष्टृसहितस्य पत्नीवतो देवता त्वेनि
रपेक्षपत्नीवद्दैवमत्वस्य बाधः तद्धितेन पत्नीवत इव मन्त्रेणात्वष्टुरपि देवतात्वकल्पने विकल्पः अथ
वा समुच्चय इत्यर्थः मंत्रवर्णस्य तद्धितापेक्षया दुर्बलत्वान्नैतत्संभवइत्याशयः नचैवं समग्रैरपि देव
ता त्वं न स्यादिति शंक्यं पत्नीवच्छब्दस्य यौगिकत्वेन विशेष्यप्रतिनिमयसापेक्षतया ग्रैर्विशेष्यत्वेनान्वये
पि तद्धितविरोधात् तस्मात्त्वष्टा सहेति स्तुतिमात्रार्थमिति प्रयोजनस्य षष्ठ्यां च॥ ॥त्रिशब्दपरार्थत्वा

शा॰भी
२८

28

ना ॥ एभिरिति। आ एभिरिति ऋचः। आ इ अश्व पाहि। अनेनान्वयः। हे अग्ने त्वं एभिस्त्रयस्त्रिंशद्देवैः वक्ष्यमाणैस्त्रयस्त्रिं
शद्देवैः सह सरथं समानरथं यथा स्यात् तथा आ याहि नानारथं यथा स्यात् तथा वा जेभ्यः अर्वाक् पूर्वं आ
याहि। छिनत्ति नवषष्ठ्या विभवः समर्थाः आगमसत्रिंशतं त्रीश्च त्रयस्त्रिंशतं इमर्थः पत्नीवतो देवान् त्व
धा सोमाय त्वमन्नमनुत्तं कक्षीकृत्यावह ततो माद्यस्व तत्पिबेत्यर्थः। आसि देशिकसंगत्या विभारे वीतमंत
मक्षिकाशंकां दर्शयति। पूर्ववदिति। मंत्रवर्णसामानाधिकरण्यात्। मंत्रवर्णसामानाधिकरण्यनिर्देशा
त्। पत्नीवत्त्वं बृहस्पतिशेषत्वापेक्षायामग्न इति मंत्रे गाग्नेरिवानेन मंत्रेणात्रयस्त्रिंशद्देवानामपि पत्नी
वत्त्वेन देवतात्वेन कस्यचित् विरोध इति भावः। त्रयस्त्रिंशद्देवाश्चरक्ता वुक्ताः। अष्टौ वसवः एकादश रुद्रा
ः द्वादशादित्याः प्रजापतिश्च वषट्कारश्चेति एवं चेति। न हि पत्नीवत्त्वमात्रस्य देवतात्वं किं तु यजमान
कर्तृकत्यागोद्देश्यत्वेन तत्स्वाग्नेरेव अग्नाइ स्याधर्पवमंत्रेपा नावगमात्। पात्नीवतमंत्रेपि साक्षाद्दावाहनो
क्तेरिति भावः। प्रयोजनं स्पष्टं स्पष्टत्वात्। त्रिंशत्त्रयस्त्रिंशद्दीपिनोपनक्षणाद्याः कृतः परार्थत्वात्। अग्नि राम
त्व समर्थत्वात्। ईदृशाग्निर्यः स्त्रीयभागेनान्यानपि तर्पयतीति चरमस्त्रार्थः ॥ ॥वषट्कारश्च कर्त्रवत् २८

॥ ॥अनुवषट्कारेति। सोमस्याग्नेवीहीत्यनुयजतीत्यनेन प्रधानानन्तरं यागान्तरं विहितमनुवषट्कारः तत्र चा
ग्निर्मीनर्वर्णिकी देवता। हे अग्ने सोमस्य शेषं वीहि भक्षयेति मन्त्रलिङ्गात्। प्रकृतौ ऐन्द्रप्रदाने। तत्कार्यापन्नः प्र
धानभूतसोमयागापूर्वसाधनीभूता सूत्रार्थस्तु। वषट्कारशब्देनानुवषट्कारस्तेन चात्र देवतालक्षि
तल्लक्षणयोच्यते। सानोपलक्षणीया। अग्नेर्व्वादिपानकर्मत्वादिति ॥ ॥छंदः प्रतिषेधस्तु सर्वगामित्वा
त्॥ ॥स्विष्टनादिति। अग्नेरैन्द्रेषु हेन मन्त्र इति स्विष्टतामुख्यादित्यर्थः सूत्रार्थस्तु। सर्वगामित्वात्। धर्माणां सर्व
प्रदानसाधारण्यादन्यत्र इति तु शब्दार्थः कथं तर्हि षोडशिसंस्थायामनुष्टुपछंदस इति भक्षमन्त्रेन म
तीमन्यथाभावरूपनमनोक्तिस्तत्राह छंदः प्रतिषेध इति। षोडशिनस्तृतीयसवनस्थत्वेन नमतीछंद
स इति प्राप्तौ तत्प्रतिषेधरूपमप्राप्तमेवानुष्टुपछंदस इत्यन्यथाभावरूपं नमनं विधीयत इति ॥ ॥ऐन्द्रा
ग्नेत्तु॥ ॥उपलक्षणं। सोमविशेषणात् यागप्रकाशप्रदानमितीति। तथा चैन्द्राग्नदेशेन सकृस्येतीद्रपीत
पदार्थ इत्यर्थः उक्थ्येति उक्थ्येऽप्यपोर्मीत इति उपमातेति प्रयोगवदित्यर्थः मात्स्य वत्सानस्यापि
प्रयोकपर्याप्तत्वादिति भावः वक्ष्यत इति। नवमे इत्यर्थः मिश्रविषये। मिलितोद्देशपक्षे अन्यतरे

णा॰ एकैकेन॰ चतुर्धेति॰ आग्नेयं चतुर्धा करोतीति विहितं चतुर्धाकरणमग्नीषोमीयपुरोडाशेऽप्यानयतीति तथो
हेत्यर्थः सूत्रप्रयोजनेस्पष्टे ॥ ॥छन्दश्च देवतावत् ॥ ॥केवलेति॰ केवलं गायत्रच्छन्दोपेतताहृशं प्रदानं सोमया
गः नियमेन सापेक्षस्येतयागरूपान्यपदार्थसंबंधित्वादित्यर्थः निरपेक्षाणामिति॰ स्वस्वावांतरकार्य
इत्यर्थः सूत्रप्रयोजनेस्पष्टे ॥ ॥सर्वेषां ॥ ॥लिंगादिति॰ ऐन्द्राग्नमंत्रकं भक्षणमिति लिंगात् भक्षाद्दु
त्तरं सिद्धांत इत्यर्थः भक्षणामित्यस्य पूर्वार्धेन च पुनः लक्षणाद्दोषमेवोपपादयति॰ तत्पुरुषेत्यादिना॰ तथा च
द्वन्द्वार्थकपीतपदेन तदवयवलक्षणात्तत्पुरुषाधिकेति बहुव्रीहिरेव प्रकरणानुगृहीतस्वरानुग्रहात्स्वस्वा
कार्य इत्युपसंहरति॰ तस्मादिति सूत्रार्थस्तु सर्वेषामैन्द्राग्ने इन्द्रप्रदानभक्षणमेकमंत्रं॰ एकरूपमंत्रव
त्त्वेनत्वनैन्द्राणाममंत्रकत्वं विकृतमंत्रवत्त्वमेवेतितु शब्दार्थः किंयत्समानस्य लक्षणादूपभक्तिसंबंधित्वा
द्वानल्पकालेन तस्य च तत्पुरुषे बाधाद्बहुव्रीहिणा सर्वतस्याधिकारः इन्द्रपीतपदेनेति॰ एतेन शापनं ग्रह
णापूजार्थं ॥ ॥इति श्रीमत्तत्सद्रामभट्टात्मजवैद्यनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां तृती राम
याध्यायस्य द्वितीयः पादः ॥ ॥श्रुतेर्जाताधिकारः स्यात् ॥ ॥इह विवादपदस्य वाक्यप्रमाणकत्वं विनियोग २९

स्पष्टक्रतिलिंगोपजीवकत्वान्न द्विचारानेतर्यमिति सूचनायाह· एवैति· वाक्येति च प्रकरणादित्रयोपलक्षणं·
तेषामपीह विचार्यत्वात्· तत्र वाक्यं नामांगत्वकल्पनानुकूलपदसमभिव्याहारः· यथोच्चैर्ऋचा क्रियत इत्या
दावुच्चैस्त्वादेः ऋग्वेदविहितकर्मांगत्वकल्पनानुकूल उपक्रमगतो वेदपदसमभिव्याहारः· तेन च मंत्र
द्वारकं लिंगमानर्थक्यतदंगन्यायेन कल्प्यत इति तेषां· लिंगप्रकरणादावशक्तरूपे च नातिप्रसंगः· श्रु
तौ तु शब्दशक्त्यैवांगत्वावगमान्न तत्कल्पनेति द्वारत्वमिति· तेषां नादितितपः कुर्वीरणादिस्वर्थः· सू
त्रस्थ ज्ञातपदं मंत्रार्थकमित्याह· मंत्रेति मंत्रकार्यसंबंधिनो धर्मा इत्यर्थः· वेदधर्माः· वेदविहि
तकर्मधर्माः· एवं प्रश्नवचनव्याख्यानं दर्शयति· ज्ञाचेति· ज्ञकर्मत्रेरणापाकार्यं तद्वेदैरित्यर्थः· सिद्धां
ते वाक्यार्थमाह· ऋगिति· ऋग्वेदेन पक्षिप्यते विधीयत इति ऋग्वैदिक इत्यर्थः· विधेः स्पष्टत्वासंशयवीजमाह· उपक्र
मइति· तथा चोपक्रमेणैकवाक्यत्वावगमे भावेन मंत्रवेदपदाद्विप्रतिपत्तिरित्यर्थः· एकैकस्मिन्नृगादिमंत्रेपि वे
दपदस्याविरोधान्न विप्रतिपत्तिरित्याशंक्याह· वेदशब्दो हीति· न चैवं सति द्वित्रिवाक्यश्रवणतोऽभूद्द्रस्यपदे
षोनस्यादिति शंक्यं· उपादेयत्वस्यान्नेवेदत्वावच्छिन्नावयविनस्तदाश्रितावयवानां च साधनत्वावगतानां

शा· दी·
३०

वां

साहिंसस्य विवक्षितत्वोपनिषेधेनुवाद्यतयास्ताहिंसा विवक्षरोनवेदावपव अवरोपिदोषोपपत्तेः अत एव वंह
ताकद्यानेऽव पविनिपमत्तद्रक्षरानिषेधेवपव मात्रस्यापिवर्जनमुपपन्नमिति स्फुटं मत्वैः प्राभाकरो मिम
तः स्यापिता इति· तेषामग्यत्रार्थवरोनपादव्यवस्थेतिसत्त्रे इत्यर्थः· जगादिप्रापेति· क्रगादिबहुत्वेत्यर्थः· गु
रात्वादिति· विध्यंगत्वादित्यर्थः· मुख्यस्यप्रथमस्याप्यर्थवादस्येत्यन्वयः· मुख्यस्याप्यंगत्वेन दौर्बल्ये दृष्टांत
माह· मुख्यपाति· प्रथमानुक्षेपापीत्यर्थः· त्वधर्मता· त्वसंवधितेन धर्मः· पर्वकालरूपांगसपादनेपस्यास्त्वत्ता·
वक्ष्यत इति· अंगगुणविरोधे च तादर्थ्यादिति क्षाद्रूशाध्यायाधिकरणे पदृष्टपापभुनासोमेन वापजेत सोमावास्या
यां पौर्णमास्यां वायजेतेति विहितपर्वकालत्वं प्रधाने सोमएव संपाद्यं न तु मुख्यापामप्यंगभूतायां दीक्षरापा
पामिति वक्ष्यतेतद्विदिव्यापिस्यादित्यर्थः· तथा च मुख्ये वापर्वचोदनादिति मुख्यप्राबल्यन्यापस्यांगगुणावि
रोध इति न्यायोपवादकइतिभावः· सतित्वमुख्यार्थमंत्रकापांगविधापकतारूपा स्वधर्मतेत्यर्थः· अप्राप्तेति
प्रापकप्रारणारूपताप्पर्यग्राहकाभावप्रदर्शनं· जाताधिकारा इति· मंत्रजातमधिकृत्य विधेया इत्यर्थः· अंगगुणावि
रोध न्यायवैषम्यं प्रतिपादयन्सिद्धांतमाह· लब्धात्मन इति· गुणानेरपेक्ष्येणापर्यवसितविधानस्येत्यर्थः· प्र राम
कृते तु नैव मिमाह· विधुद्देशास्त्विति· अलब्धात्मा· अर्थवादनैरपेक्ष्येणापर्यवसितः· लब्धात्मानं· निश्चिता ३०

र्थं· एतदेव व्युत्पादयति· यद्यप्येवमादिना· कथं मंत्रविषयत्वेनाल्पत्वात्मकत्वं तदुपपादयति· तथाहीति· असंजातप्रति
प्रतिपक्षत्वात्· असंजातविरोधप्रतिसंधानत्वात्· यथाश्रुतेति· वेदरूपशाक्यार्थपर एवेत्यर्थः· उपजातेति· उपजातवि
रोधप्रतिसंधानत्वादित्यर्थः· तत्प्रश्नोक्तहेतोर्न लक्षणायैव विध्यर्थपर्यवसानमिति भावः· एतेनैव परप्राबल्यन्याय
स्यापि नायं विषय इत्यपि सूचितं· तदुक्तमयपक्षे दाधिकरणे· पूर्वापरबलीयस्त्वं तत्र नाम प्रतीयतां· अन्योन्यनि
रपेक्षाणां यत्र जन्म धियां भवेदिति यदुक्तम प्राप्रार्थत्वान्न विधौ लक्षणेति तत्परिहरति· उपक्रम एवेति· वेदत्व
स्य हि वेदस्य विधिसंबंधोवगम्यते अन्यथा तद्धानर्थक्यात्· तथा चानुवादकत्वेन रागादिपदस्य वेदपरत्वा
वगमाधकत्वाल्लक्षणेत्यर्थः· पूर्वोक्तप्राभाकरोक्तमर्थं व्युत्पादितत्वे एतदधिकरणाविरोधमेवाह नु माह· एकदे
शिनां विति· तावच्च· वेदकत्वमात्रं च· निरपेक्षवेदकत्वमसंभवादपि न निमित्तमित्याह· नहीति· साधारणाः
समुदायतद्व्यवसाधारणार्थः· कांस्येति यथा कश्चिद्गुरुः कांस्याकांस्यभोजी शिष्यस्य कांस्यपात्रे गुरुत
च्छिष्टभोजननियमवतोनुसारी कांस्यभोज्येव भवतीति तद्वदित्यर्थः· एवं चोक्ताधिकरणान्यायोपि पूर्व प
क्षानुगुणः स्यादिति भावः· प्रयोजनं पूर्वपक्षे यजुर्वेदविहितकर्मांगभूते मंत्रे उच्चैस्त्वं· सिद्धांते त्वपां

मुत्वमिति॰ सूत्रं स्पष्टं॥ ॥गुरावानुरव्याव्यतिक्रमे॥ ॥याजुर्वैदिकमिति॰ वसंते ब्राह्मणोऽग्नीनादधीतेत्यादियजु
र्वेदविहितमित्यर्थः॰ वाक्यं दीपसामविशेषः॰ सामवैदिकस्वरऽच्चैस्त्वं॰ याजुर्वैदिकऽपांशुत्वं॰ संदेहइति॰ ऋचाक्षिपतइत्या
दिनाऽऽम्नेयाद्दिकरणाकव्यापारोऽभिधीयते सचोपमंत्रविनियोगविधानरूपः किंवाप्रयोगविधिरूपइतिसंदेहादितिभा
वः॰ एवंचप्रसंगात्व्याख्यानंतरसंगतिः सूचिता॰ प्रधानेति॰ प्रधानभूतयाजुर्वैदिकाधानप्रयोगविधिप्रयुक्तोपांशुस्वरस्य
त्यर्थः॰ स्वयंवेदेति॰ सामविनियोजकसामवेदप्रयुक्तोच्चैःस्वरइत्यर्थः॰ प्रधानेति॰ नचरूक्ष प्रधानेऽपांशुत्वं॰ अंगेतू
च्चैस्त्वस्यकोविरोधइत्यतआह सांगहीति॰ स्वरस्यप्रयोगविधानेऽपितेननतद्विधेयत्वात्प्रयोगस्यचसांगप्रधानसं
बंधित्वात्सांगएवप्रधानेऽपांशुत्वविधानाद्विरोधइतिभावः॰ विधिना॰ प्रयोगविधिना॰ ततः ऽपांशुत्वं॰ नच
गेक्षिपमाणामुपांशुपात्वमंगधर्मएवेत्याशंक्याह तेनेति॰ प्रधानार्थतयोपांशुत्वविधिरेवाहि प्रधानइवांगेषु
पितत्स्यापकइतिस्यानभेदेऽपिनशेषिभेदइत्यर्थः॰ सिद्धांतितमिति॰ भाष्यकृतेतिशेषः एवंचेति॰ व्याख्यान
इतिशेषः॰ उच्चैस्त्ववदुपांशुत्वस्याप्यंगधर्मत्वमितिविशेषाशंकासमाधानपराद्दः व्याख्यानमिति॰ वार्त्तिककृ राम
तेतिशेषः॰ उपजिरितितद्वेदविहितत्वस्यसंपादनायोक्तं यवेति॰ अतात्स्यविनियोगादितिभावः॰ प्रथमभा ३१

वित्वात् प्रथमोपस्थितत्वात्· न शक्यत इति· कृञोनुष्ठानवाचित्वादिति भावः· सूत्रार्थस्तु गुणप्रधानयोर्व्यतिक्रमे
धर्मविरोधे गुणस्य प्रधानार्थत्वान्मुख्येन निमित्तेन वेदसंयोग एव स्वरप्रयोजक इति· वार्त्तिकमप्ने गुणमुख्यश
ब्दसमन्विविनियोगपरौ ज्ञेयाविति॥ ॥भूयस्त्वेनोभयश्रुतीति॥ ॥प्रसंगसंगतिमभिप्रेत्याह· यजुरिति· यद्यपि ऋ
ग्वेदेपि समाम्नातस्तथापि ऋक्सामवेदयोः स्वरैक्यात्तदनुक्तिः सूत्रेपि चोभयेषु क्रियेति वोध्यं कतरेति· किं वि
कल्पेन स्वरद्वयमुतैक एव कश्चिन्नियत इत्यर्थः· एतद्विचारांगत्वेन विचारान्तरमाह यत्रेति· क्रियत इत्यनेन नत
द्वेदविहितत्वस्यैव स्वरनिमित्तत्वोक्तेरिति भावः· अनियम इति· विनिगमकाभावाद्यत्रैव विधिरिति नियमाभा
वे प्राप्त इत्यर्थः· ननु कत्वाविदेकत्र कदाचिद्विधानं त्वन्यत्रेति विधेरनियमो व्याख्येयः· विधानरूपेवस्तु निविक
ल्पायोगादित्यवधेयं· व्यवच्छिन्नं इतरव्यावृत्त्याऽद्विराम्नातिपरिच्छिन्नं समाप्यते· निराकांक्षा भवति· न चै
वं सति तत्पक्षवराणवैयर्थ्यं शक्यं· स्तोत्रादिविधानार्थमनुवादार्थत्वादिति भावः· सूत्रे तूभयत्रश्रुतिः· अत्र
वरोपस्यतत्कर्मभूयस्त्वेनांगबाहुल्येन अमुकवेदविधेयमिति ज्ञेयं· अंगबाहुल्यं च कर्मस्वरूपपरिचा
यकद्रव्यदेवतादिपौष्कल्यरूपं बोध्यं· ननु बहुत्वं अनुपयोगानन्तरं भवतु प्रतीवकान्न चेति· प्रयोज

शा॰ दी॰ नस्य षष्ठः ॥ ॥ असंपृक्तं प्रकरणात् ॥ ॥ वाक्यविनियोगानंतरमेव तदुपजीवकानंतरप्रमाणनिरूपणे कर्त
३२ व्येऽपि वाक्यप्रसंगागतं तद्विशेषजितासानि हत्तान्तवसरसंगत्येदानीमनंतरप्रमाणनिरूपणं क्रिय
त इति सूचयन्नाह श्रुतीति। वाक्यपादव्यवहारस्तु वाक्यव्युत्पादनबाहुल्यात्प्राधान्यमभिप्रेत्य
राय: अंगेन वेत्यध्यायसंगतिकथनं। उक्तसंशयबीजमाह यदीति। प्रकरणस्य प्रमाणानव
तारस्य चैधासंभवमाह तत्रेति। विपर्ययश्च प्रकरणमप्रमाणमित्येवंरूप इति वक्ष्यति। आ
घपक्षद्वयेन पूर्वपक्षस्य मंदत्वात्तृतीयपक्षानुसारेणाह अथवेति। स स्वर्गः स्यात्सर्वा
न्प्रत्यविशिष्टत्वादिति विश्वजिदधिकरणसूत्रे। द्वितीयं तु रात्रिसत्रस्य प्रतिष्ठाफल
कत्वसाधकं अर्थवादे प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयंतीतिरूपेनिर्देशादिति। फलस्य स
र्वथा अनिर्देशे स्वर्गः कल्प्यः निर्देशे तु तदेवेति। प्रकृते चैवमेवाप्यनघत्वस्य क्रियते वर्मण्यजमा
नस्य प्राप्तव्यस्याभिमतत्वे इत्यर्थवादिकशत्रुपराभवः फलं कल्प्य इत्ययं अर्थवादे निर्देशस्या राम
सार्वत्रिकत्वादसंतानुपस्थितस्वर्गकल्पनाप्राप्त्या पु ३२

त्वादाह दर्शयतीति। प्रकृताभिप्रायमिदं। पत्रपत्त्र्यायानं तदुपलक्षणार्थं बोध्यं। एवं सति कल्पप्रकारएव कल्प्यतामि
त्याशंक्याह नेति। कर्तारपेक्षां विना तदुपकारकल्पनायोगादिति भावः। कर्तारनाकांक्षत्वेस्यादेवं तत्त्वसिद्धिमि
त्याह। कर्तारयातीति। यागेन स्वर्गं कुर्यादित्यत्र केन किं कथं कुर्यादित्याकांक्षा जायते सेति कर्तव्यताकांक्षेत्यर्थः। अप्र
त्यक्षमयागीति। येन कर्मणा सैन्नेजयेजुहुयादिति विधानवाक्ये नानुपादाने अनवगम्यमानामित्यर्थः। न घाप इ
ति। अनुपस्थितानाकांक्षसंबंधापेक्षयोपस्थितसाकांक्षसंबंधे उपस्थिताकांक्षयोरकल्पनादिति लाघवमित्य
र्थः। हेत्वंतरमाह तस्येति। तद्यासतीत्यर्थः। यागेनेति। स्वर्गकामाधिकरणन्यायेन भावनायाः पुरुषार्थभाव्यकत्वनि
यमादिति भावः। नतायत इति। स्वर्गस्यालौकिकत्वादिति भावः। फलं साधयतीति। शास्त्रप्रामाण्यादिति भावः। सि
द्धमादिति भावः। नतायत इति। अग्निहोत्रमते निराकर्तुं पूर्वपक्षिमुखेनोपन्यस्यति। यदीति। अनुग्रहाकांक्षायाः अनियमात्कदाकांक्षये
त्यपेक्षेदेशिमतं निराकर्तुं पूर्वपक्षिमुखेनोपन्यस्यति। कार्येति। कार्यस्य निरूपकत्वोपधानमित्यर्थः। ननु कर्मणोपि प्रतिबंध
कवाक्यत्वमिति दूषयति। तदयुक्तमिति। कार्येति। कार्यस्य निरूपकत्वोपधानमित्यर्थः। ननु कर्मणोपि प्रतिबंध
काभावादिसहायापेक्षास्तीत्यत आह अपि चेति। प्रकारेति। यद्यपि तेनास्ति प्रकाराकांक्षेति एवमेवोक्तं तथापि
काभावादिसहायापेक्षा पुनरभिधानं कर्तव्यतेति। कृतिविषयस्य हि भावो विधयतयाकृतिरेवेति भा
तिकर्तव्यताशब्दार्थप्रदर्शनार्थं

33

वः तर्हि प्रकारवती क्रियेतिकर्तव्यता तत्राद्यार्थः स्यान्न क्रिया प्रकार इत्याशंक्याह क्रिया प्रकार इति। मयूरव्यंसकादेराकृ
तिगणत्वात्सर्वपदार्थप्राधान्यमिति भावः। धात्वर्थयागादेर्विशेषरूपेणावगतत्वादाह किं पुनरिति। उत्तरमाह क्रिये
ति। धात्वर्थस्य व्याहृतमर्थमाह भावनेति। ननु यागेन स्वर्गं कुर्यादिति यागरूपसाधनस्य स्वर्गरूपसाध्यसंबंधावगति
र्निराकांक्षैवेत्याशंक्याह यागेनेति। करणस्य कर्तृव्यापारविशेषानुपहितस्य फलानुत्पादकत्वात्तदाकांक्षायां नियमा
सामान्यतश्च कर्तृव्यापारस्य भावनाख्यस्य निर्विषयस्यायोगात्करणविषयत्वावगमात्तद्धि सेयं व्यापाराकांक्षायां
तेषां करणोपकारकत्वावगमः कुठारेणा घादिमादाविवानिर्ज्ञातप्रकारस्य कथमित्याकांक्षायामुद्यमननिपत
नादिरूपकर्तृव्यापारविशेषाणां हस्तेनोद्यम्य निपात्येति शब्देन कुठाररूपकरणोपकारकत्वावगम इति भावः। ननु
सिद्धे कुठारादावन्वयव्यतिरेकवशाद्व्यापारांतरापेक्षायामप्रसिद्धयागादेरर्थाक्षिप्तानुष्ठानेनैव नैराकांक्ष्यमि
त्याशंकते। नन्विति। दूषयति। न हीति। मृत्पिंडाप्रसिद्धिदशायां मृत्पिंडेन घटं कुर्यादित्यत्र क्रमेण मृत्पिंडसंपादनातिरि
क्तदंडचक्रादिव्यापारस्याप्यपेक्षणावगमान्नायं नियम इत्यर्थः। ननु लोके दृष्टानुसारात् द्वैविध्यस्यापि द
र्शनेऽप्यत्रावश्यकेन यागानुष्ठानेनैवाकांक्षाशांतिः स्यादित्याशंकते। नन्विति। उच्यते। तात्पर्यविषयीक्रि

प्तेः न हीति॰ असिद्धस्य करणत्वायोगादनुष्ठानस्य शब्दतात्पर्यविषयत्वेपि तन्मात्रेण स्वर्गसंपादनासिद्धे
र्मानाभाव इत्यर्थः॰ एवं चाकांक्षायोग्यतासन्निधिरूपसामग्रीवशादियता नियामकप्रमाणाभावाद्वस्य सर्वस्यैव प्राकर
णिकस्येति कर्तव्यतात्वेनान्वयः प्रमाणानुमतः सिध्यति॰ अपूर्वे तु दर्विहोमादौ द्रव्यदेवतादिसन्निपत्योपकारिके
तिकर्तव्यतापेक्षणेनाकांक्ष्यं॰ व्यापारान्तरग्राहकप्रमाणाभावादित्यष्टमे वक्ष्यते॰ ननु स्वर्गकामो यजेतेत्यस्य स्वर्गकाम
स्य यागविषयकं कार्यमित्यर्थः॰ कार्यविषयत्वं च यागे कृतिद्वारकमिति प्राभाकरैः शक्यते न त्विति॰ यागे कृतिविष
यत्वं दुर्वचमित्याह॰ किमिदमिति॰ साध्यत्वमुद्देश्यत्वरूपं उत कृतिव्याप्यतारूपं॰ आद्ये आह॰ स्वर्गो हीति॰ स्वर्गस्यो
द्देश्यतया यागस्यावश्यकत्वाद्यागस्यापि तद्गीकारे वाक्यभेद इत्यर्थः॰ द्वितीयं दूषयितुमुपन्यस्यति॰ अथेति॰ अत्रा
पि पक्षे किं यागविषयककृतिरेका स्वर्गोद्देश्यका परेति कृतिद्वयमुतैकैव कृतिरिति विकल्प्य मनसि निधायाद्यं
दूषयति॰ स्यादेवमिति॰ कथं तर्हि कृत्या साधयेदिति व्यवहारस्तत्राह॰ कृत्येति॰ द्वितीयं दूषयति॰ कुर्यादितीति॰
कृत्येतरेककर्मत्वेन तत्पर्यायत्वात्स्यापि तथात्वेन वाक्यभेदप्रसंगादिति भावः॰ ताद्रूप्येण॰ अभेदेन॰ यागेति॰ य
तो धातोर्यज्यादिकाद्दिव्यादिग्रंथेन भावार्थाधिकरणे यागातिरिक्तव्यापारस्यैव भावनात्वाभिधानादित्यर्थः॰ न

त्र च· कारकत्वपक्षे च· नाम्नामिति· तृतीयांतनाम्नामुद्भिदादीनामित्यर्थः· अत इति· स्वर्गकृतेरनिर्ज्ञातप्रकारत्वा
दित्यर्थः· अनुष्ठात्रा विप्रसेनेन संनिधिरुक्तः· ननु चैत्र भुंक्ष्वेति प्रक्रम्य· अपमोदनं दृढं दधिसर्पिः· शाकं इक्षुक्षौद
षोपकारिणां भोजनेति कर्तव्यतात्वेनान्वयावगमवद्दिहापि द्रव्यदेवतादेरेवोपकारयोग्यतास्तानां तथावगमे
पि सामिधादेः कथमिति कर्तव्यतात्वेनावगम इत्याशंक्याह· संभवति चेति· यागविषयत्वं यागोपकारकत्वं· तथा
चादृष्टद्वारोपकारकत्वसंभवाद्योग्यतानिश्चयाभावेनान्वयोपपत्तिरिति भावः· तत्त्वेवं सति यागानुष्ठानप्र
तीतेरपन्यायः स्यादित्याशंक्याह· अननुष्ठितश्चेति· कुर्यादित्यतेन प्रधानवाक्यार्थप्रदर्शनं· कथमितीति
कर्तव्यताकांक्षायाः कथमित्यस्य व्याख्यानं केनेति· अंगप्रधानवाक्ययोरेकवाक्यतां दर्शयति· तद्याम
ति· तत्तस्मादुक्ताकांक्षावशादित्यर्थः· द्वारमिति व्याप्रियेतेति क्रियाविशेषणं· अवधानादीत्यादिपदसंगृही
तोत्तमप्रयाजादेर्देवतास्मरणरूपः संस्कारो द्वारभूतो ज्ञेयः· न च श्रुतिविनियोज्यस्यावघातादेः कथमात्रो
पादानं· श्रुत्याद्यसंयुक्तस्यैवासंयुक्तं प्रकरणादिति सूत्रेण प्रकरणग्राह्यत्वोक्तेरिति वाच्यं· श्रुतेर्ब्रीह्या राम
दिद्वारसंबंधमात्रे व्यापारादपूर्वसंबंधस्य च प्रकरणाधीनत्वादविरोधात् अत एव प्रकरणाविरोध्यसंपु ३४

34

ऽभिप्रायमसंपृक्तपदं वार्त्तिके व्याख्यातमित्यवधेयम् स्वरूपेति । यागस्वरूपेत्यर्थः । आख्यातवाच्यव्यापा
रसामान्यस्य समिदादिव्यापारविशेषात्मकतां दर्शयति । एवंभूत इति । ईदृग्रूप इत्यर्थः । असौ सामान्यतः
प्रत्यक्षावगतः । ननु समिदादिना यागस्य क उपकारः क्रियते तत्राह । फलारंभेति । फलमारभ्यते नेनेति फला
रंभोपूर्वं तदाभिमुख्यं च तज्जननानुकूला शक्तिस्तद्रूप एवोपकार इत्यर्थः । रूपमेव च शक्तिर्योग्यतेति अरंवउ
करणोपकार इति च शास्त्रे व्यवह्रियते । विकृतौ च प्रकृतिवच्छब्देनातिदिश्यत इति बोध्यं । तत्र चापि विशे
षः । आरादुपकारकांगैः प्रधानीयसमपूर्वे परमापूर्वजननानुकूला शक्तिरुत्पाद्यते । सन्निपातिभिस्तु प्रधानपू
र्वभाविभिः प्रधानेऽस्मिन्नपूर्वजननानुकूला शक्तिरुत्पाद्यते । प्रधानसमकालिकैस्तु तत्र वर्त्तिभिश्च प्रक्षे
पास्विष्टकृदादिभिस्तु ऽस्मिन्नपूर्वे एवारादुपकारिवदिति । प्राभाकरः शंकते । नन्विति । प्रधानस्य हि प्र
करणांगानां । इति कर्त्तव्यताकांक्षामात्रस्य प्रकरणत्वे तेषामपि तदापत्तिरिति भावः । स्वमते त्वधिका
रापूर्वे इति कर्त्तव्यताकांक्षैव प्रकरणमिति नातिप्रसंग इति तात्पर्यं । इष्टापत्त्या परिहरति । कस्येति । एवं स
ति परस्परांगत्वमंगानामापद्येतेति शंकां निरस्यति । अत एवाचार्यांतरेति वाचनिकांग संदेश एव तदुप्रवः

35

अन्यत्र तु प्रधानाकांक्षयांगाकांक्षातिरोधानान्नातिप्रसंग इति भावः. नन्वेवमपीति. अग्न्याधानस्य तु सोमः स्यादि
मा एषाभिकल्प्यापातसमिद्धादेश्च स्वार्थविहितदेवताराहित्येनाव्यक्तत्वादिति भावः. प्रतिबंधापरिह
रति. भवन्मतेऽवेति. साधिकारत्वं च विश्वजिन्न्यायेन फलकल्पना दोषश्च. वाचनिकेति. अमावास्यायाम
पराह्ण इति वाचनिककालस्य दीक्षोपसदाद्यंगसहिते पितृयज्ञे संभवेन तद्बाधप्रसंगादिति तेषां स
माधानं. एतद्देवाज्यापीत्याह. इत्यपीति. सांगयोर्दर्शपूर्णमासयोः पूर्णमास्यमावास्याविहितौ न सौमिक
तंत्रानुष्ठानेन बाधः स्यादिति भावः. वास्तवसमाधिमाह. अपि चेति. पशुकांगत्वात् प्रयाजेभ्यस्त्वादिति व
चनविहितमात्रस्य. तत्संस्कारश्च यद्ग्रहणादयो मंत्रवर्णानसमिद्धा अग्रज्या यस्येत्यनेन प्रकाशयमाना
समिद्ध्यादेवता. वेधादिसंस्कारा उद्धननवनपरिसमूहनाभिघारणादयः क्रमेणाज्ञेयाः. अंगेत्या
दि वेधादिविशेषणं. समानत्र. एकस्मिन्नेवाहवनीयप्रदेशविशेषे पंचापि प्रयाजा होतव्या इत्यर्थः. स
न्निपत्योपकारकांगस्याकल्प्यस्य कृत्स्नविधानत्वरूपस्यापूर्वत्वप्रयोजकत्वाद्धव्यमाणाब्दभेन तद्वाह
.सर्वैहीति. अतएव हीति. कृत्स्नविधानत्वादेवेत्यर्थः. अन्यथा. वाचनिककालबाधप्रसंगप्रकारेण

दुर्वारइतिकाल्नतरोनहिप्रधानसाहिमबाधेपिमांगबाधः स्यादितिभावः॥ उक्तमर्थंकारिकयासंगृह्णा
ति॥ अतइति॥ प्रयोजनंपूर्वपक्षेप्रयाजादीनांविश्वजिद्वत्स्वातंत्र्येणफलार्थप्रयोगः सिद्धांतेतुदर्शप्रयो
गांतरैचतत्साद्गुण्यार्थम्॥ तथाविकृतावतिदेशानतिदेशाविमृध्यं॥ सूत्रंस्पष्टार्थम्॥ ॥ क्रमस्थदेशसामा
न्यात्॥ ॥ उपांशुयाजक्रमइति॥ आग्नेयानंतरमुपांशुयाजपाठः एवमाग्नेयानुमंत्रणानंतरं द्विरिस्या
धनुमंत्रणमंत्रइतियथासंख्यपाठरूपक्रमइत्यर्थः॥ इतिनाचादब्धोभूयासमितिशेषभागग्रहणं॥ अ नद्
स्यचमंत्रमुच्चारयन्नेवमंत्रार्थत्वेनसंस्मरन्॥ शेषिणांतन्मनाभूत्वास्यादेनुमंत्रणामिमक्रमलक्षणानु
मंत्रणसमाख्यातत्वादिति॥ श्रुत्यादिवदंगत्वावबोधकत्वादेर्विशिष्टकइत्यर्थः॥ अदब्धः अहतः॥ उपांशु
याजांगमेति॥ उपांशुयाजमात्रांगत्वमेवेत्यर्थः॥ अप्रमाणत्वादिति॥ श्रुत्यादिवदंगत्वावबोधकत्वादित्यर्थः॥
क्रमादितिव्याचष्टे॥ स्थानेति॥ प्रथमद्वितीयादावित्यर्थः॥ मंत्रइत्यत्रोपतिष्ठतइत्यनुषंगः॥ संबंधार्थमिति
लोकेचैत्रमैत्राभ्यांदधिपयसीदेयेइत्यत्रयथासंख्येनान्वयप्रतीतिदर्शनादितिभावः॥ कथंसंबंधा
र्थमित्याकांक्षायांप्रकरणादेःपूर्वप्रमाणत्कल्पनयेत्याह॥ आकांक्षामिति॥ उपांशुयाजविषयाम्

साधारणमित्यर्थः ननु लिंगक्रमसमाख्यानादिति वक्ष्यमाणेन पौनरुक्त्यमित्याशंक्याह नैतद्युक्तमादितस्य क्र
मस्य लिंगेनापि प्राप्तिमात्रेण तत्रोच्यत इत्याशयेन तत्राप्यमन्यापमति दिशति एवमिति सूत्रे व्याकुर्वन्नेव क्र
मसामान्यलक्षणं तद्विशेषविभागार्थमाह क्रम इतीति एवं च क्रमश्च विनियोगे प्रमाणं कुतः देशसामा
न्यरूपात्तस्मादाकांक्षादिकल्पनेनांगत्वबोधादिति सूत्रार्थ इति भावः अनुष्ठानसादेश्यं एकप्रदेशे
नुष्ठानं संनिधिसमाम्नानस्यापि तस्यानंतरमुदाहरणमित्यनुषज्यते शुंधध्वं दैव्याय कर्मणे देवयज्यायै
इति शुंधनमंत्रः प्रयोजनं स्पष्टं ॥ ॥ आख्याचैवं तदर्थत्वात् ॥ ॥पदार्थाइति शाखाच्छेदनपुरोनुवा
क्यासोत्रादयः पदार्थमात्रेति पदार्थमात्रोपस्थापकत्वेनेत्यर्थः मात्रपदेनांगांगित्वव्यवच्छेदः ननु समा
ख्यायाः कार्यपदार्थयोः संबंधसामान्यावगमादाकांक्षावशेनांगांगिभावावगतिः स्यादत आह अविधाप
कत्वेनेति एकस्मिन्न पदे द्वैरूप्यविधेयभावासंभवेन विधेयासमर्पकत्वादिति भावः ननु विधिनद्विधापकत्वा
भावेनेत्यर्थः तस्यश्रुत्यादिजांधारणे नोपन्यासानर्हत्वादिति बोध्यं अनादिरिति एवं च संबंधे सति समा राम
ख्या प्रवृत्तिस्तस्याश्च समासंबंधइमन्योन्याश्रयनिरासः पदार्थानां चेमादिहोतृचमसादिसमाख्याभिप्राय॰ ३६

आद्यपर्यवादिपदस्य अद्यपर्याः कर्मसमर्थेऽत्र विधानेनाद्यपुंसंबंधिकार्यवाचकत्वात् परं तु अद्यपुंकर्तृकत्वस्यापिक
ल्पनैवेति बोध्यं प्रयोगविधिरिति समारव्ययोपपद्यते इति मात्रं अंग-त्वावगमस्तु कल्पितप्रयोगविधिवाक्येने
ति नोक्तदोष इति भावः आरव्याप्येवं अंगत्वे प्रमाणं तदर्थत्वासंबंधार्थत्वादिति सूत्रार्थः ॥ ॥ श्रुतिलिंग ॥ ॥
श्रुत्यादिप्रमाणाद्युत्पादनं विना तेषां बलाबलनिरूपणायोगात् तदुपजीवकत्वसंगत्यान्तेषां बलाबलं चिंत्यत इति
सूचयन्नाह इदानीमिति एकस्मिन् विषये शेषरूपे समवायोऽभिन्नशेषिसंबंधबोधकत्वेन भिन्नानां तेन समर्थः
पदैः श्रागार्हपत्यमिपत्त्रैन्द्री रूपएकस्मिन् शेषे श्रुतिलिंगयोर्गार्हपत्ये ऐन्द्रीरूपाभिन्नशेषिसंबंधबोधक
त्वेन मिलितयोर्विरोधाद्भिन्नेति शेषिविशेषणं श्रुतिवाक्याभ्यां त्वेकस्य एव शेषी गार्हपत्यो बोध्यत इति तद्वार
णं व्रीहीन् प्रोक्षतीति श्रुते बर्हिर्देवसदनं दामीति लिंगस्य च विरोधाभावादेकस्मिन्निति शेषविशेषण
मिति दिक् प्रथममिति पाठक्रमादिमपर्थः किमिति अत्र च किमिदं शेषत्वमेव किं वा इदं शेषत्वं गार्हपत्य
शेषत्वं च विकल्पेन अथवा समुच्चयेनोभयशेषत्वं उत गार्हपत्यशेषत्वमेवेति संशयोपन्यासे कर्तव्येऽपि
फलमुखेन तदुपन्यासे तात्पर्यं शेषत्वविचारस्यैवाध्यायार्थत्वात् बलाबलविचारस्यापि तदर्थत्वेनैव

शा॰ दी॰ ३७ कर्त्तव्यत्वात् । ननु गार्हपत्यपदं इन्द्रपदरूपश्रुतेरुभयपक्षसत्वात्कथं बलाबलचिन्तेत्याशंक्याह । यइति । अग्रं गांगिव
रूपे विनियोगे एकत्र श्रुतिः इन्द्रांगत्वे तु न सा किंतु लिंगमेवेतिभावः । द्वितीयां तेति । क्रियां तत्फलशालित्वस्य त
दर्थत्वादितिभावः । नेदं श्रुतिलिंगविरोधोदाहरणमितिशंकते । नन्वि[?]मइति । श्लोकं व्याचष्टे । गार्हपत्यमित्यत्रा
दिना । यथा केवलाच्छ्रुतिर्न लिंगेन विरुध्यते तथा वाक्यमपि केवलं न लिंगेन विरुध्यत इति लिंगवाक्यवि
रोधोपपन्नस्यात् ऐन्द्र्या गार्हपत्यमुपतिष्ठेत वा इंद्रमुपतिष्ठत इति लिंगाविरोधेनैव वाक्योपपत्तेः । एवं च
श्रुतिवाक्ययोर्भिन्नतयोर्लिंगेन विरोध इति वक्तव्ये गार्हपत्यमित्यादिना हि कथं श्रुतिलिंगयोर्विरो
ध इत्युच्यते न लिंगवाक्ययोर्विरोध इति शंकते । कथं पुनरिति । समाधत्ते । श्रुतेरिति । प्राधान्येन व्यपदे
शो भवतीति न्यायापाद्यतया राज्ञैव विरोधव्यपदेशो न तु राजभटेन तथा प्रकृतेपीत्यर्थः । एतद्व्यपदेशमात्रस
मर्थनेऽपि वस्तुतः श्रुतिमात्रेण विरोधो न सम्भवति तः स्यादतः समाधत्ते तस्मादाह । अपवेति । येन हि यत्त्वा
ध्यते तेन तस्य विरोध इत्युच्यते नान्येन । इह तु वाक्यबाधेऽप्रामाण्यप्रसक्तेरिति न तेन विरोधः शक्यो
वक्तुं । श्रुतिबाधे तु नाप्रामाण्यप्रसंग इति तद्बाधात् श्रुत्यैव लिंगस्य विरोध इत्यर्थः । कथं नहि स्यानंत राम ३७

इत्यादिमंत्रे वक्ष्यमाणो लिंगेन वाक्यस्य विरोधस्तत्राह। यत्रेति। तस्मिन्नसादेत्यादेर्भिन्नार्थसादनप्रतिपादकत्वे
नैकवाक्यत्वबाधे प्रप्रामाणापाप्रसक्तेरित्यर्थः। द्वयोरिति। इंद्रगार्हपत्ययोरित्यर्थः। प्रबलेन दुर्बलस्य बा
धस्यैवप्रकृत इत्याशंक्याह। यद्यपीति। एवं च मंत्राद्द्यासमुच्चयसंभवात् श्रुतिप्राबल्येपि न लिंगबाध
इत्यर्थः। तत्र तावद्दृष्टपक्षस्य स्वीकाराह। न्यायेन गतार्थत्वेन परिहारमाह। सत्यमिति। लिंगस्य द्वै
विध्यादेकाभावेप्यपरस्याहाप्येनश्रुत्याविनियोगसंभवान्न मुख्यसामर्थ्याविरपकतेत्यर्थः। न चेति। न श्रु
तितुल्यतेत्यर्थः। एतदेवोपपादयति। विनियोग इति। श्रुतेः योर्थ्वं समीपे तु विनियोगांगत्वबोधः लिंगस्यासौ वि नि
योग आरात् दूरे स्थित इत्यन्वयः। पश्चादिति पाठे तु श्रुतेः श्रुतिसंबंधिविनियोगात्पश्चादनंतरं आरात् दूरे स्थित इ
त्यर्थः। एतदेव विशदयति। यावदिति। अयमर्थः। मंत्रार्थावगसेः श्रुत्यर्थागत्वावगतेश्चैकः कालः मंत्रार्था
वगमोत्तरं तदंगत्वयोग्यतारूपलिंगज्ञानं ततो मंत्राकांक्षाप्रतिसंधानं ततः श्रुतिकल्पनं ततोंगत्वबोध इति विप्रक
र्ष इति। न च लिंगादुपस्थितस्यैव साध्यसाधनभावस्य प्रयोगविधिना विधानसंभवाच्छ्रुतिकल्पनमसिद्धमि
ति वाच्यं। सिद्धांते शब्दाध्याहारांगीकारेण शब्दानुपस्थितस्य साध्यसाधनभावस्य प्रयोगविधिविधेयत्वायो

शा. दी.
३८

38

गानंतमप्रतिपादकश्रुतिकल्पनस्यावश्यकत्वात्. नन्वेवं किन्नेर्वितप्रवृत्त्विकस्यापि लिंगस्य कुतो बाधस्त
त्राह. आकांक्षेति. निर्मूला. मंत्राकांक्षारूपमूलरहिता. तेन. आकांक्षारूपमूलोच्छेदेन. अप्रवृत्तस्य लिंग
विनियोगस्य कथं बाध इत्याशंकां लौकिकदृष्टान्तेनाप्राप्तबाधत्वव्युत्पादनेन परिहरति. प्रत्यक्षे चेति.
अविरोधं पूर्वोक्तं परिहरति. अविरोधादिति. राद्धांतिप्रवर्त्तते:॥ ॥लिंगवाक्ययो:॥ ॥स्योनमिति. आ
स्येनोपलक्षितायां पाच्यां पुरोडाशस्थाप्यते. तत्रायं मंत्रः हे व्रीहि राशे मेधसारभूत पुरोडाश ते सदनं स्थानं स्यो
नं श्लक्ष्णांतं सुखहेतुं कृणोमि करोमि घृतस्य धारया सुशेवं सुखशयनं कल्पयामि तस्मिन्नमृतस्य
पेसीद तिष्ठ सुमनस्यमानः संतुष्टः सन् प्रतितिष्ठ प्रतिष्ठां प्राप्नुहीति तदर्थः. इतीति. सा कल्प विभाग
योर्विकल्प इत्यर्थः. विभज्यैवेमस्य विवरणस्योनादिरिति. विकल्पत्रये क्रमेणाहेतुत्रयं दर्शयति.
पदीत्यादि. विभागो हि लिंगवशाद्भवेत. वाक्यप्राबल्ये तु लिंगबाधान्नस इति भावः. उभयत्रेति सा
मान्योन्या विकल्पसमुच्चययोः कोटीकारः नच मंत्रवाक्यस्य सादनविशिष्टसदनप्रकाशनेसदनविशि राम ३८

पसादनप्रकाशनेचतात्पर्यतदनेकत्वादेकवाक्यत्वानुपपत्तिरिति वाच्यं॰ उच्चारणभेदेन तात्पर्यभेदोपप
त्तेः॰ अनेन मंत्रेण सदनं सादनं प्रकाशयेदिति चैकैव मूलश्रुतिः कल्पनीयेति॰ वस्तुतस्तु अनेन मंत्रेण स
दनं प्रकाशयेदित्येकैव श्रुतिः कल्प्यते॰ न च विनिगमकाभावः मुख्यत्वपात् असंतानविरोधत्वेन सदनकर
णस्यैव मुख्यविरोध्यत्वं॰ सादनस्य तु तस्मिन् सीदेति साधेभत्वबोधात् सदनविरोधत्वमिति निपाम
कसत्वात्॰ तस्मात् सदने सकलो मंत्रः प्रयोक्तव्य इत्येव पक्षो निष्ट इति तेषम॰ तुल्येति॰ एकस्यार्थस्य द्विः प्र
काशनवैयर्थ्यात् सकलं च विभज्य चेति समुच्चयपेनोक्तः न युज्यत इति॰ पूर्वार्द्धेन सदनं प्रकाशयेदुत्तरार्धेन साद
नं प्रकाशयेदिति श्रुतिद्वयकल्पनागौरवादिति भावः॰ न त्वाख्यातभेदे कथमेकवाक्यत्वमत आह तस्मिन्नि
ति॰ तस्मिन् कल्पयन्निति विभागे साकांक्षत्वाघेन क[illegible]रा[illegible] न च नपानु[illegible]पादस्यादिव देकवाक्यत्वमा
वश्यकं अन्यथा साकांक्षतया वो मा हपद्वेति॰ एतदेवोपपादयति॰ कल्प्येति॰ कल्प्यश्रुतिर्येन तथात्वमि
त्यर्थः॰ उपसंहरति॰ तेनेति॰ एवं च वाक्यस्वारस्यात् सकलप्रयोगो लिंगस्वारस्यात्तु विभज्येति द्वितीयपक्षः प
र्यवसित इति भावः॰ अशक्येति॰ वाक्यापेक्षया शीघ्रमित्यर्थः॰ कथं तत्राह॰ वाक्येनेति॰ लिंगं॰ सदनविशि

घ्रसादनप्रकाशनरूपं · अस्यार्थः · अंगांगिभावः · एतदेव प्रपंचयति · स्योनं त इत्यादिना अक्षारिणाकमि
ति · विशेषणप्रकाशनद्वारेणार्थः · वस्तुतस्त्वर्थैक्यादेकवाक्यमिप्यत्रैकवाक्यतायां निरासानुन्नतसं
भवइत्याह · एवमिति · ॥ ॥ वाक्यप्रकरणयोः ॥ ॥ निगद इति · अस्त्यतिशेषः · अग्नाविष्णोमोइदं हविः पुरस्ता र
रूपं अनुषंगेतां पूर्वप्रयोगे अस्यैवेतां अवीवृधेतां हव्यं तो अभवतां मायोमेषु महस्ते ते · अक्रांताक्रतं वंता
विमर्थः · स्थितामिति · कृत्स्नोपदेशादुभयत्र सर्ववचनमिमश्चाग्नि तीयपादेसिद्धांतितामिमर्थः · तदेतर्गताइमार
भ्येमादपइमंतंपृथक्वाक्यं · उक्तार्थस्य प्रकृतोपयोगमाह · तस्मादिति · उदाहरणानां समर्थयति · स्यादेतादृति
नचतथा · नाविनियोजकमितिनेमर्थः · कृतप्रयोगमंत्रं विनाभाव्याकांक्षायाः अनिवृत्तेरस्यास्त्रप्रकरणाधीन
त्वादितिभावः · नच सिद्धरूपाणां मंत्राणां नामक्रियात्मकतया कथंतद्विशेषरूपे तिकर्तव्यताकांक्षारूपप्रक
रणविषयतेतिवाच्यं · उच्चारणाद्देवताप्रकाशनादिक्रियायोगेन तेषामपि प्रकरणविषयत्वोपपत्तेः · तदुक्तं · ना
वांतरक्रियायोगादृते वाक्योपकल्पितानां · गुणाद्वीकथंभावैर्गंतांति प्रकृताः क्रिया इति · अवघातादीनां
तुक्रियारूपत्वात्स्वतएवप्रकरणग्राह्यतेत्याह · अवघातेति · कथंतर्हि सूत्रे असंयुक्तमित्युक्तं तत्राह · असं

षसादनप्रकारानरूपं·अत्र समर्थः·अंगांगिभावः·एतदेव प्रपंचयति·स्योनं पृक्तामितीति·विशेषणं·संपृक्तां ध्वा
वर्त्यकं·अप्रधानार्थाध्याहारक्लेशादाह·पदेति·अस्यार्थस्यैतदधिकरणासिद्धत्वमतो ऽत्रैवैयर्थ्यमिमाशंक्यानुवादत
यावस्तुकथनमात्रमभिप्राह·तदपीति·येभिरिति·प्राभाकरादिमतमर्थः·एवं हितन्मतप्रक्रिया·स्वसन्निहितसकलग्राह
कत्राप्रधानापूर्वैरणाग्रहणां नाम तदन्वितत्वेनाभिधाने·व्यवहारेणसर्वेषां पदानां कार्यान्वितार्थपरत्वव्युत्पत्तेः·ए
वं चारादुपकारकस्य प्रयाजादेस्तदंगत्वयोनकरणतपासंभवति·संनिहितधात्वर्थाविरोधात्तत्र अप्रकरणेनिक
र्तव्यताकेनतत्पर्यवसानमभिनिवर्तव्यताकांक्षान्नप्रकरणाधीनामपिति तेषां तदिति नियोगता·संनिपाति
नां तु करणोपकारं विना प्रधानापूर्वीनवयानुपपत्तिरूपेयाद्यानप्रमाणेन करणांगत्वं अस्मादिभिर्द्वीप्याद्यंघ
गतां द्वारमिति अस्मादिकमेव करणांगत्वानि वीहकेनप्रकरणामिति·इदमिति·भाष्यकारोदाहृतमित्यर्थः·
उपात्तेम·भाष्यानुपपत्तिशंकारूपः·पूर्वपक्षमाह·तत्रेति·अकथनमात्रेणापहवापोगादाह·पदेति·सर्व
स्यसाक्षात्परंपरयावाप्रधानार्थत्वावश्यंभावात्तस्य च प्रधानाकांक्षारूपप्रकरणाधीनत्वादुपनीतव्यतयापु
करणस्यैव प्राबल्यमिति भावः·येनेति·येनाग्नीषोमाविमादिपदेनैकवाक्यता इदं हविरिमादेः प्रमष्टे

शा.दी.
४०

निशेषः तत्र सामर्थ्यं स्वार्थविशिष्टतदर्थप्रकाशनरूपं मन्त्रस्य शीघ्रं कल्प्यते ततः श्रुतिस्तया विनियोग इति स
न्निकर्ष इत्यर्थः अपरत्वन्तु इन्द्राग्न्यादिपदेषु परस्परापोः निराकांक्षयोः प्रक्रियावशादिमे न ध्याचष्टे अत्रत्य
स्येति । अग्नीषोमाविदमेतत्समभिव्याहृतस्येत्यर्थः तद्धीपदेवतेति । तदीयसर्वदेवतेत्यर्थः । विचारेणेति । प्र
करणोदाहृतविधिमादेः प्रधानैकवाक्यता । ततस्तदीयसर्वदेवतापदैकवाक्यत्वकल्पनपूर्वकं सर्वदेवताप्रप
काशनसामर्थ्यरूपलिंगकल्पनं ततः श्रुतिकल्पनेन विनियोग इत्यर्थः ॥ ॥स्थानप्रकरणयोः॥ ॥विदेव
नेति । अक्षैर्दीव्यतीति विहितद्यूते आदिनाशौनःशेपमाख्यापयतीति विहितशौनःशेपाख्यानं अभि
षिच्यत इति विहितोऽभिषेक इत्यर्थः । तत्तच्चेति । विशेषतः आकांक्षाकल्पना इत्यर्थः तदाह सर्वेति सर्वं शी
घ्रं अभिषेचनीयांगत्वं तन्मात्रांगत्वं एतेन स्थानात्प्रकरणस्य बलीयस्त्वं न्यायेन धर्मेति । किंचित्संनि
ध्याम्नातप्रयाजाद्यंगेष्वर्थः किमर्थं नहि तद्विहायपक्षस्याभिषेचनीयोदाहरणाभिमाशंक्याह अपि चेति
आग्नेयादेरनिर्दिष्टाकांक्षत्वात्तन्मात्रांगतासंभाव्येनायिन विहितसम्प्रत्ययप्रक्रियस्य च नार्थमिदमुदाहृतमिति राम ४०
भावः । विकृतित्वादिति । श्रुतोपकारसाकांक्षाः प्रयोगप्रकृतेः सह संबध्यते सन्नीपस्थविकाराः प्रोक्षचो

प

दितन्यापादिति भावः क्रमडपकाले दृष्टादृष्टरूपः प्रकृतौ येषामंगानां तत्साकांक्षी विकारा विकृतयः प्रथमं
प्राकृतैरंगैः संबध्यते समीपस्थत्वेनंगं प्राप्स्यमत्वेनितदर्थः तथाच प्रकरणात् सर्वार्थत्वमिति सिद्धांतानुपप
त्तिरिति शंकाभिप्रायः रातस्स्य पात्मनेति रातस्य पत्वसामान्यरूपेणमर्थः नचविषुपशुसोमयानामेवरा
तस्त्वपपदार्थत्वात्तेषां च प्रत्येकं निराकांक्षत्वात्समुदायस्य चातिरिक्तस्याभावात्कथमाकांक्षेति कथमि
ति उत्तरमाह कृत्यादीति पवित्राख्यः सोमयागः एवं क्षत्रस्य धृतिर्यागविशेषः अतेनुष्टुपः एना आप
तथा च राजसूयत्वेन रूपेणाकांक्षोत्थानसंदंशावशादस्तीति सिद्धांतोपपत्तिरिति भावः प्रयोजनं पूर्वपक्षे
पवित्राख्यसोमयागविकृतौ विदेवनाद्यप्रवृत्तिः सिद्धांते तु प्रवृत्तिरिति ज्ञेयम् ॥ ॥ क्रमसमाख्ये ॥ ॥
पौरोडाशिकेति पौरोडाशिकमिति समाख्यापतीत्यर्थः शुंधनं प्रक्षालनं तस्य क्रमे पाठः शास्त्रानेशुंध
नविधित्वात् शास्त्रानेमंत्रसंहितापाठमित्यर्थः शुंधध्वं दैव्याय कर्मणे देवयज्यायै इति मंत्रः पात्रपादेत
च्छुंधनपरः विशेषेति समाख्ययैव संबंधत्वाभावादाकांक्षादिकल्पनायाश्चोभयत्रसाम्यादिति भावः
एवं द्वितीयपक्ष उपपादितः प्रथमपक्षमुपपादयति संबंधेति समाख्यागम्यसंबंधस्यांगामित्व

पर्यवसानाछ्रुतिवद्विनियोगबोधकत्वादिति भावः नहीति सर्वत्र योगिकैः शब्दैर्द्रव्यमेवाभिधीयते॥ न
हि संबंधवाच्यत्वं संभवयति गोरत्वादिमरूणाधिकरणत्वर्निके नत न्निरासादिति भावः कथं तर्हि सं
बंधप्रतीतिस्तत्राह समभिव्याहारादेवेति कल्प्यंतव्यइति वैशिष्ट्यान्यथानुपपत्त्यासामान्यतः कल्पनीयइ
त्यर्थः देशेति स्थानसादृश्यरूपइत्यर्थः संबंधस्य वाच्यत्वमभ्युपेत्याप्याह अथापीति तथाच वस्तुसिद्धे
प्रमाणाधीनत्वेन समाख्ययासंबंधासिद्ध्यभावान्न कल्पनमावश्यकमित्याह अत इति ततः सामर्थ्यान्मति
विशेषतः पुरोडाशपात्रस्रुंधनप्रकाशनरूपमित्यर्थः सकलाधिकरणार्थमुपसंहरति तदेवमिति मू
लेच्छेदात कल्पनामूलभूतप्रयोजनाकांक्षोच्छेदात प्राभाकरोक्तं प्राप्तबाधत्वं निराचिकीर्षुराह सोपमिति
अत्र परेषां प्राप्तबाधत्वाभ्युपगमे हेतुभूतो भाष्यग्रंथः अथ यत्र तत्रोच्यते इदमनेन बाध्यते इदमनेनेति
तत्किं बाधकविषयं प्राप्तमुताप्राप्तमिति किं चातः यद्य प्राप्तं किं बाध्यते अथ प्राप्तं कथं शक्येत बाधितुं प्रा
प्तं बाधकविषयं पूर्वविज्ञानमिति विरुद्धमइत्यादिस्तमिमं भाष्यग्रंथं श्रुतिंगादिव्यतिरिक्तसामान्यविशेषा
दि बाधविषयत्वेन व्याकुर्वंस्तद्विरोधशंकामपाकरोति पवित्रयादिना शास्त्रप्रदेशेषु तत्तदधिकरणेषु

अनेन तत्र तत्रेति वीप्सया अधिकरणभेदाभिप्रायत्वं तच्छब्दस्य परोक्षाभिधायित्वस्वारस्यं च दर्शितं । इ
दमनेनेत्यस्य व्याख्यानं प्राकृतमित्यादि । प्राकृतं कुशादि । वैकृतेन शरमयं बर्हिर्भवतीति विकृतिविहितेन
शरादिना । सामान्यं आहवनीयादि । विशेषेण । पदे जुहोतीति विशेषविहितेन पदादिना । भाष्येति मकृत्स्नस्या
द्यो निरासे बीजमाह । अकृतिलिङ्गादिवदिति । अकृत्यादिसारूप्येणातिमपक्षाशंकायाः उत्कटत्वात् प्रथमं तदुप
न्यास इति भावः । अकृत्यादिवच्छास्त्रप्रतिबंधसंभवात् किं बाध्यत इति भाष्यानुपपत्तिमाशंक्य तद्वारयन्नाह
तद्वदेवेति । अकृतिलिङ्गादिवदेवेत्यर्थः । तस्य । प्रापकशास्त्रस्यातिदेशरूपस्य । एकत्वात् । अंगान्तरसाधारण
त्वात् । चोदकः अतिदेशः । आद्यपक्षनिरासे अभ्युच्चयमुक्तिं दर्शयति । अकृत्यादीति । लोके प्राप्तबाधस्यैव द
र्शनादाह । शास्त्रेति । शास्त्रस्याप्रामाण्यापत्तेरित्यादिति भावः । सिद्धान्तभाष्यार्थमाह । प्राप्तस्यैवेति । बाधक ध
शास्त्रविषयं प्रतिप्राप्तं पूर्वविहितानं सामान्यशास्त्रादिविहितं तान्न बाध्यत इति भाष्ययोजना । नन्वेवं सति
प्रापकशास्त्राप्रामाण्यं स्यादित्याशंकायां परिहर्तुमाह । दशमाद्य इति । अपवादविषयं परिहृत्य तत उत्सर्गो नि
विशत इति न्यायेन सामान्यादिशास्त्रस्यापवादातिरिक्तरूपवत्तायाः सार्थकत्वात्पर्यविषयाबाधेन नाप्रामाण्यं

शा॰ दी॰
४२

आपातबोधे मिथ्यात्वबुद्धिरेव च न तस्य बाध इति दशमाद्याधिकरणोक्तयुक्त्यादितमित्यर्थः ननु भाष्यस्य तत्रेति तच्छ
ब्दवशेन प्रकृतविषयत्वावगमाद्धीस्मयाष्टश्रुत्याद्यनेकविषयत्वेनोपपत्ते बाधव्युत्पादनं तेच तदेतेषामि
त्यादिनाश्रुतिलिंगाधिकरणोपसंहाराद्युक्त्यादिविषयत्वस्वारस्याद्दूरमत एवाख्येयमुक्तेति शंकांत दूषणावा
र्त्तिकोपन्यासेन निरस्यति स्थिते चेति अस्यं पूर्वार्धे बाधस्योक्तप्रकारत्वात्स्थश्रुत्यावन्न युज्यन इति अस्यार्थः
नैतद्भाष्यं श्रुत्यादिविषयं श्रुत्यादिनालिंगादिबाधस्यार्थविप्रकर्षादिति हेतुव्युत्पादनेन निर्णीतप्रकारत्वा
त्किं प्राप्तमप्राप्तं वेति प्रश्नानुपपत्तेः एवं कल्पनामात्रनोक्तेद कथनेनाप्राप्तबाधत्वे स्थिते तसिद्धे सति प्राप्तबा
धोपमितकत्तरासंगतेश्चेति अत्रोत्तरार्धोक्तस्योत्तरासंगतिरूपदूषणस्य परैः परिहारः कृतस्तमनूद्य दूषय
ति न चास्येति सामान्यत इत्यादि निवर्त्तत इत्यंतो ग्रंथः न चास्य दूषणस्य इमनेन ग्रंथेन परिहारत्वेशङ्क्य
च यः सामान्यत इत्यादेरयमर्थः सामान्यतः लिंगविनियोग्यमंत्रसादृश्यात प्राप्तिर्लैंगिकविनियोगस्मरणतः वि
यो शेषभेदग्रहणास्मरणायोग्यत्वदर्थश्चापरोपतः स्मृतेः प्रमोषस्तन्नानुत्तत्रेरवोनिमित्तंयत्र तत्पतीति क्रियाविशेषणं राम
प्राप्तितानंल्लिंगविनियोगविशिष्टज्ञानामिति व्यवहरंतिजनाद् इति शेषः विरोधावगमात विरुद्धश्रुतिद ४२

र्शनकृतात् प्राप्तिस्मरणमेवेदं न विशिष्टज्ञानमिति भेदाग्रहात् निवर्त्तते व्यवहार इति शेषः तथा च वस्तुतः प्रा
प्तज्ञानं तद्बाधयोरभावेऽपि भेदाग्रहनिमित्तव्यवहारस्य प्राप्तस्य बाध इति दूषणापरिहारः कथमयं न परिहारस्त
त्राह न हीति शीघ्रप्रवृत्तपाश्वाविशेषदर्शने सति लिंगाद्याप्तिव्यवहारस्यासंभवादित्यर्थः न च श्रुतिम
नालोचयतस्तत्संभव इति वाच्यं विरोधिदृष्टोपपत्तौ विप्रकर्षहेतुकबाधनिरूपणादिति दूषणमुपसंह
रति अत इति उपदेशेन सदृग्रूपदेशेन बाधविद्यामित्यर्थः ॥ ॥ अहीनो वा प्रकरणात्केरणः ॥ ॥ अतः परमि
ति तथा च बलाबलविषयपरिशोधनार्थं तपातच्छेषतपासंगतिरित्यर्थः प्रथमामिति विषय बकुंन्यादिति
भावः सहेति तं सह हानीनां संख्यापयतीति वाक्यशेषादिति भावः उपसत्त्वे त्रिसंख्योपसन्नाकोऽपि विशेषव नि
त्वे द्वादशेति द्वादशाहस्यादिः प्रकृतिर्यस्य तस्य द्व्यहत्र्यहादेरित्यर्थः षष्ठीश्रुते रुभयथाप्युपपन्नेत्याह अ
ष्टो हीनेति तत्रैव ज्योतिष्टस्येवेति विकल्पेनेति भावः ष्टोम एव अबाधे नोपपन्नौ वाधायोगादिति भावः स्वप्र
मयेति अन्तः स्व क्रतावितिस्तत्रैणान्तस्य समूह इत्यधिकारपाठितेन स्वप्रमयविधानादित्यर्थः प्रकरणेति
स्वप्रमयान्तत्वे प्रकरणविरोधप्रसंगादित्यर्थः तथा चोभयविधयोगार्थसंभवेऽपि प्रकरणाद्बाधायनज्जस

ष्योति

मासांतत्वमेवयुक्तमितिभावः हीपनइत्यस्यन्यूनत्वार्थताभ्रमनिरासायाहनतहतीति ओहाक्त्यागइतिस्मात
नुसारादितिभावः अर्थांतरमिति अन्यथाऽहीनपदोच्चारतावैयर्थ्यादितिभावः द्वादशत्वविधानार्थशक्तां
तरेतानिदृशसंभवतामुख्ययुक्तिमाह रूढिश्चेयमिति तत्रापि द्विरात्राद्यहर्गतोपि आसीरन्नुपेयुरिति
शब्देनविहितानिकर्माणिसत्रपदेनोच्यन्ते यौगिकत्वमात्रे क्रतुष्वप्यहीनपदप्रयोगः स्यादित्यवश्यंरू
ढिरंगीकार्येतिभावः नकेवलंरूढिबलियस्त्वेननञ्समासांतत्वनिरासः किंतुस्वरविशेषादप्याह
मध्योदात्तमिति अहीनपदे मध्य ईकारः स उदात्तोयत्र तादृशंतच्चाख्यप्रमांतत्वेभवति नञ्समासेत्वा
द्योदात्तत्वस्यादित्यर्थः एतच्चव्याख्यानग्रंथेनुपपदमेवस्फुटीकरिष्यते क्रमेणव्याचष्टे साह्नेति सं
ताभेदादेवेतिशेषः उपपद्यतइत्यत्रशेषः तावतासंताभेदमात्रेणा अर्थांतरंतावदर्थांतरमित्यर्थः एक
वाक्यत्वेऽध्यमाने अर्थांतरमित्यनन्वयापत्तेः अथवा अहीन इतिशब्देनोच्यमानमर्थांतरमित्यर्थ इत्ये
कमेववाक्यं अव्ययेति तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याइत्यनेनतत्पुरुषेअ राम
व्ययस्यनञः पूर्वपदस्यतस्यप्रकृतिस्वरत्वेनाद्यसमासाभावदशायांपायः स्वाभाविकः स्वरः निपाताआ ४३

त

घृतान्नाद्यत्यादिविहितत्वेऽद्यात्रस्वरस्तत्वदत्वेनेत्यर्थः नन्वेवप्रसपातत्वेपिप्रत्ययत्वनिमित्तमाधुदात्तत्वमिनादेशात्स्वत्वमे
वस्यान्यतदूतरंतस्याप्रसपत्वादितिकथंमध्योदात्तत्वमतआह तथासतीति एवप्रसपातत्वेसतीत्यर्थः आदिनाआ
पनेपीनेपापइत्यादिसूत्रचतुष्टयविहिताग्रहणं तेनेषुउपदेशिवद्वचनेनउपदेशोस्थानीरवप्रत्ययपस्तद्वदाववत्व
नेस्वरसिद्ध्यर्थकर्तव्यमित्यर्थः षष्ठीति प्रसपानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वादितिभावः ननुद्वादशाहे
द्वादशोपसदइतिप्राकरणिकेनवाक्येनद्वादशोपसत्वविधानतस्यवचातिदेशेनाहर्गणान्तरेष्वपितत्सिद्धेरि
देवाक्यमनुवादकंउपसत्त्रित्वविध्यर्थवादइतिकथमेतदुक्तमाह रगाणिमित्याशंक्याह तानीति शाखांतरगतत्वे
नवैयर्थ्याभावादितिभावः सर्वशाखोपसंहारन्यायेनैकेनैवविधिनानुष्ठानसिद्धेरनेकादृष्टकल्पनापाद
कविध्यर्थत्वयोगादनुवादकत्वपक्षमाह वाक्यांतरेति शंकापरिहारंदर्शयति सर्वथेति तथाचकिमहो
नत्कर्मविरोधात्सोमातिदेशमेऽप्राप्ता द्वादशोपसत्ताविधीयते इत्यश्रुत्यादहर्गणप्राप्तास्त्रयर्थमिहान्यघन
इत्यधिकरणार्थइतिभावः पूर्वपक्षेसोमातिदेशमेउपसत्त्रित्वद्वादशत्वयोर्विकल्पः सिद्धान्तेनतुनेतिप्रयोजन
नंबोध्यं प्रदेहुत्वपृक्तं ॥ ॥त्वपनोइति इत्यादिकाम् चंद्वयोर्यजमानयोर्निमित्तयोःसन्नोःप्रतिपदंब्रक्षिप्य

द्विचैव

वमानाख्यस्तोत्रे प्रथमो कुर्यादित्यर्थः बहिःपवमानस्तोत्रावांतरप्रकरणात् ज्योतिष्टोमस्येति स्तोत्रद्वारा प्र
करणात् ज्योतिष्टोमसंबंधिन्या विप्रुषर्थः राजपुरोहितौ पनेपातामिति विहित एकाहः क्रतुः कुन्नापाख्यः
रणात्॥ ॥संगतिं दर्शयति अनारभ्येति पत्रसस्यापवागंतत्समाप्तौ तत्बुद्धिस्थभवतीति न्यायात्प्रसंगरिति मा
वः समानासमानविधित्वचिंतनात्मादभेद इमवगतव्यं कत्वव्यभिचारादिति कृत्वेनोपयोगः कृतावेवेति नियमादि
मर्थः तद्वारेण कृत्वादिद्वारेणोस्मर्थ्यः नन्वेति तथाच प्रापक प्रमाणाभावोप्यदेशातिदेशयोः शेषमोघरूपवैयर्थ्य
विपर्णताविधेरपेक्षितात् कृप्राप्तिः समैवेमर्थः न चातिदेशस्यसर्वांगविषयस्यैकवाक्यत्वकृतोपर्णताविध्युत्तरमे
वातिदेशतोविकृतौ कृप्राप्तिरितिपूर्णत्त्वपर्णताविधौतदाहेति प्रसंगइतिवाच्यं पर्णतायाउपदेशादेवजम्यत्वेन ताम
तद्वातिरिक्तांगानामेवातिदेशकल्पनादिममनुपदमेववक्ष्यमाणत्वात् कल्प्यत्वेपि वैयर्थ्यदोषः कृप्तेनतद्भित्रविष
यत्वे वदुर्बलप्रमाणस्यापिचितमाशयेनपरिहरति मैवमिति अनुपपत्तइमनुमानंतस्मादनुमेयादिमर्थः सिद्धं

तमाह । मैवमिति । ननु परीतानातिरिक्तस्यैवातिदेशाद्दमुक्तमेवेत्याशंकां निरस्यति । यथोक्तेनेति । तर्हि कथमतिदेशस्त
त्राह । प्रकारास्त्विति । येन प्रकारेण प्रकृतमपूर्वं कृतं स प्रकारः सर्वांगोपकारसंपादनात्मकस्तत्र विशेषणीभूता
न्यंगानि । तत्र विशिष्टोपकारातिदेशे अर्थात्तद्विशेषणीभूतानामतिदेशसिद्धिरित्यर्थः ॥ ननु तेन परीतापामास्तु विशे
षणत्वमिति शंकां निरस्यति । समुच्चितान्येवेति । प्रकृतिविद्विकृतिरित्यतिदेशात्प्रकृते स्वसर्वोपकारवैशिष्ट्याव
गमात्सर्वेषां विशेषणत्वमावश्यकमित्यर्थः ॥ अत एव बर्हिः कार्यमिति देशप्राप्तानामपि कुशानां तत्कार्ये विशेषतो वि
हितैः शरैर्बाधः प्राप्तबाध इत्युच्यते ऽन्यथा ऽप्राप्तबाधः स्यादिति । आनुमानिकस्याप्यतिदेशस्योपपत्त्याप्यतेनावाध्य
तामाह । अवरं चेति । प्रयोजनं पूर्वपक्षे विकृतौ परीतानां चोपेयत्वं वेदविहितमेषनिमित्तं प्रायश्चित्तं । सिद्धान्ते त्वाति
देशिकत्वेनानुर्वेदविहितत्वाभावान्नेति । किं तद्विहितानभेषनिमित्तमिति । अप्रकरणात्तत्क्रतु विशेषप्रकरणाभावा
त्सर्वार्थं परीतादीतिसूत्रार्थः ॥ ॥प्रकरणाविशेषात् ॥ ॥ द्वयोः सामप्रदरूपयोः चदरूपयोः । वाक्येति । वाक्यप्रमाण
कविनियोगाविशेषादित्यर्थः ॥ नन्वेति । तथा च यांच दरूपसामप्रदरूपयोर्विकल्प इति भावः । मन्यत इत्यनेन सूचितं प्राक
रणिकप्राबल्यं निराकरोति । नचेति । नन्वयनयोर्हि विरोधे सति तत्तो वनवन्तरेणाप्यवस्थापितान दुर्बलेनेति भावः ।
पूर्ववदिमापवादिकीसंगतिः सूचिता । सान्निध्येनीमात्रसंबन्धे वाक्यद्वयस्याविशेषेपित मात्रेणानर्थक्यापादकपूर्व

८

शा·दी संबंधावश्यकत्वे प्राकरणिकस्य प्रकरणावशेन शीघ्रं तद्वगतिः अनारभ्याधीतस्य तु विनंवेनेति वैषम्यात् प्रकृति
३५ गामित्येताह· साभिधेनीति· स्वरसतः उभयाकांक्षारूप प्रकरणात· तत्रैव· प्रकरणा एव· तादर्थ्येन· प्रकृतापूर्वार्थत्वेन·
त साधनरूपेति· अपूर्वसाधनतारूपेण लक्षितसामिधेनीरूप द्वारसंबंधे सती मर्थः· प्रतिपन्नेति· प्रतिपन्नः क्र
६५ तु संबंधो यस्य तथाभूतं सामिधेनीरूपं निगं क्रतु तापकं तद्वशादित्यर्थः· एतदेवकथंचिदित्यनेनोक्तं· तत्रापीति
सामिधेनीलिंगोपस्थित ततत्वद्धि क्रत्वपूर्वसंबंधस्य सामिधेनीद्वारसंबंधस्य च विधाने गौरवात· उक्तं सामिदर्शपा
र्ण तु प्रकरणे· नापूर्वसंबं क्लृप्ते द्वारसंबंध मात्रविधानेन नाघवादितिभावः प्रकरणे· नविशेषात· पौर्णदर्शपस्य प्राच च
न्यात्तद्विरोधिसामिदर्शपविकृतौ स्यादिति सूत्रार्थः प्रयोतनं स्पष्टं॥ ॥नैमित्तिकं तु॥ ॥विकृतावितीत्यनंतरं संराप
इति शेषः· प्रकृतेरिति· निमित्तसापेक्षत्वेन विनंविता सामिदर्शपासांच दर्शपस्य शीघ्रप्रवृत्तेरिति भावः· पूर्ववदित्या
पवादिकी संगतिरुक्ता· विकृत्ये नापि प्रकरणानिवेशसंभवे उत्कर्षी नौचित्यमाशंक्यांतरमाह हृद्यो वेति· विरुद्ध
वाधित्वा· पूर्वपक्षदूषणापूर्वकं बाधोपपादनं प्रपंचयति तु न्यैत्यादिना· तत· नैमित्तिकं सामिदर्शपं· तत्रापि प्रकृता तम
वपि· पौर्णदर्शपेनेति विकल्प्यत इत्यनेनाचितं· बाधोपपादकं सार्द्धश्लोकं व्याचष्टे· सामान्येनहीति· ननु सामान्यशा
स्त्राद्विशेषशास्त्रस्य प्राबल्ये शीघ्रप्रवृत्तिकत्वं हेतुः इह तु सामान्यशास्त्रे शीघ्रप्रवृत्तिकं· स्वर्गकामसामान्ये प्र

तिप्रधानविधेः प्रत्यक्षविहितत्वेन तदाकांक्षापादिविनियोगात्. स्वर्गकामवैरथंप्रति प्रधानविधेः सामान्याक्षेपगम्य
त्वेन तदाकांक्षापादिविनियोजकस्य विरोधशास्त्रस्य विलंबितप्रवृत्तिकत्वमिति न बाधकत्वं पुनरिमामाशंक्यापवादो दा
धिकरणन्यायेन परत्वात् बाधमाह तथेति. स्वाभाविकं. निमित्तोपाधिकानिति निरपेक्षं. उत्पन्नेति. उत्पन्नप्रतिपक्षजनितानं
पस्यामवस्थायां तदुत्पत्तिकत्वादिसमर्थः ततायं बाधहेतुं विहरतीति. सावकाशं चेति. एतेन. उक्तहेतुत्रयेण. अयः प्र
णपतामस्यसंनिधौ गोदोहनेन पशुकामस्य प्रणयेदिति दोहनपात्ररूपो गुणः पशुरूपफलार्थतया विधीयते.
आदिना एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य एकविंशतिसंख्यारूपगुणसंग्रहः. चमसादेरित्यादिपदेन नैमि
त्तिकसाम्पदस्य संग्रहः. येददता वा तं दर्शयन् काम्ये विशेषांशं कांद्दर्शयति. काम्यस्य हीति. तथा च नैमित्तिके समान
विषयत्वेन बाधहेतुत्वं नांकूपत्वात्पूर्वपक्षमं दतेत्याशयः. ननु गोदोहनस्य प्रणयनं कुर्वत एव फलसाधनत्वा
प्रणयनरूपविषयैक्यमात्रायं बाधः स्यादित्याशंक्यानिष्टायस्या बाधं दूषयति. तत्र बाधे चेति. मधुदधिवदि
ति. मधुनि दधिर्पस्य पुंसस्तस्येवेतिव द्वीसमर्थाद्विति. विसो: क्रियाचफलंच तयोर्विनाश इति विग्रहः.
क्रियानाशसत्वे द्वैगुण्यं. अत्र मधुस्थानीयं गुणफलं. दधिस्थानीया तत्क्रिया. शास्त्रवाक्यानीय आश्रयः
शास्त्रवादौ दर्भस्थानीयमाश्रय चैगुण्यं. विनिपातस्थानीयः क्रियागुणो भयफलनाम इतिहेयका

ष्यगुणानां विकृतावप्रवृत्तेरष्टमेभिधास्यमानत्वात्तद्विरोधेनोक्तपूर्वपक्षासंभवमाशंक्य पक्षांतरमाह· अथवेति·
अन्यं हेतुमाह आसन्नेति· साक्षात्पुरुषार्थसाधनत्वमित्यर्थः· अस्य हेतोरसाधारण्यं विवृणमाह· नैमित्तिकादेश्चेति·
प्रयुज्यते· विधिनानुष्ठाप्यते· चिरेणाक्रतुव्यवधानेन· अक्रत्विति लिंगादि· नापेनाप्राप्तबाधमप्याह· पशुकामेति· अन्ना
र्थं वार्त्तिकं दर्शयति· परिखवति· श्रौतादिति· गोदोहनेनेति· तृतीयोक्तस्य प्रणयननिरूपितस्य गोदोहनकरणत्वस्य फ
ले विधानात्प्रणयनं प्रणयने गोदोहनस्य करणत्वं श्रौतमित्याशयः· द्रव्यहीनमिति· अंगभूतद्रव्यहीनमित्यर्थः·
न तु साधनभूतद्रव्यहीनं· फलार्थप्रसक्तगोदोहनसाध्यत्वात् नैमित्तिकं साध्यद्रव्यं प्रकृतावेव तस्य यो चद्
रूपस्य विकारो वा धकं· निमित्तसंयोगविशेषादिति सूत्रार्थः॥ ॥द्रष्टव्यार्थ॥ ॥अग्निमाधिकरणोपक्षिप्तद्रव्या
दिग्रंथेन सूचयिष्यमाणोपोद्घातसंगति अतिदेशेनेति· आहवनीयस्यापि द्विरुक्तिप्रसंगेन प्रकृतिमात्रे निवेशा
दिति भावः· अग्निसंस्कारकत्वपेति· आहवनीयादेः सतः संस्कारकत्वपेत्यर्थः। अकृतीति· अग्निमाधत्त इति द्वितीया
कृतीयार्थः· प्राकरणिकेनेति· भाष्यकारवचनाकृष्यितेनपदाहवनीये जुहोतीति वाक्यांतरेणाद्वितीयार्थकस्य
ग्रामीकेनेत्यर्थः· वार्त्तिकमतेनाह प्रकरणादिति· पवित्रादिकृत्वा चिंतायां प्रकटनं· वक्ष्यत इति· तासामग्निरिति सूत्र राम
त्र इत्यर्थः· प्रकरणासंगतिमाह· अनारभ्येति· प्रयोजनं पूर्वपक्षे दर्शपूर्णमासादिष्वनाहिताग्नेरप्यधिकारः सि

ष्ठांते त्वाहिताग्न्यादेरेवेति प्रवदे वोक्तं तेषां॥ ॥तस्य रूपमर्थः॥ ॥ऋतीति द्वितीयारूपेमर्थः परीतातो वैषम्यमाह
प्रसिद्धेति प्रसिद्धं ऋतुशेषत्वं पस्य ज्योतिष्टोमादेरनादृशं परीत्वमिति पूर्वार्धान्वयः वाक्यमिति अग्निपदस्य ऋत्व
पूर्वसाधनत्वलक्षणा यापा वाक्यं ऋत्वंगत्वे प्रमाणतां स्यादित्येदिमर्थः नेति पृथक् फलं एतदेव व्याचष्टे स्यादेत
दिति साधनांशो निभावप्रधानं साधनत्वरूप धर्ममर्थः आहवनीयादेः स्वरूपमाहवनीयत्वं व्याख्यातमिति
भाष्यकृन्मतमिति शेषः प्रयोजनं पूर्वपक्षे ऋतूद्देशेन वाधानानुष्ठानं सिद्धान्ते त्वग्न्युद्देशेनैवेति॥ ॥तासाम
ग्निः॥ ॥प्राप्तेति कमिति ऋत्वनंगानारभ्य वादस्यात्र पादे निरूप्यत्वाभावादिति भावः तस्मिन्नहनि पौर्णमास्या
दिप्रधानकाले अनंगतः प्रकृतमनंगत्वात अनंगस्याप्यतिदेशमाशंक्याह प्रकृताविति चोदनायां विध्य
न्वितभावनायां कर्थभावेन इतिकर्तव्यतात्वेन चोदनानिंगात विकृतिविधिगतशकार्थरूपसादृश्यात
चोदकेनातिदिश्यत इत्यचपः ततः अतिदेशात अभ्युपेत्यवादेनाह अंगत्वेसत्यपीति पदातइतिचोदः
नप्रकृताविति अपर्यवसितविधित्वेनैष्टीनां प्रकृतावंगत्वानवगमादिति भावः आत्मानमप्यात्मप्रिनाअ
त्मविधिका नेआत्मनः प्रकृतसंगत्वेनानिर्वाचित्वविरुद्धमिति सूचितं अर्थतः अग्निसाधनत्वात् नचेकं प्रत्ये
वसाधनत्वे साध्यत्वञ्चविरुद्धं इहतु साधनत्वमन्यासां साध्यत्वं चान्यासामिति न विरोध इति शांकतेनचि

१०

शां॰ द्वी॰

67

नि॰ अत एव विरोधादेव॰ इष्टीनामग्न्यर्थत्वात्प्रथमं कृताभिरग्निसिद्धेर्न पुनः करणप्रसंग इति परिहरति॰
सर्वथेति॰ अग्न्यधिकरणत्वेन विवाद इत्यर्थः॰ प्रयोजनं स्फुटमेव॰ तत्रे चाग्निग्रहणसामर्थ्यात्तदर्थेष्टि प्राप्त्यर्थम्॥ ॥
तुल्यः सर्वेषां॥ ॥एवमिति॰ अहीनो वै प्रातरस्य प्रकरणस्य पूर्वैः सह विरोधाविरोधविचारस्य प्रसंगाच्छेषकार्य
विचारस्तत्समाप्तौ पुनः प्रकरणस्य पूर्वैः सह विरोधाविरोधचिं॰ तनमेतावत्पर्यन्तमित्यर्थः॰ अधुनेत्यनेन महा
प्रकरणेनावसरसंगतिसूचनं॰ पादसंगतिमाह॰ पादेति॰ रूपेति॰ सोमरूपसंनिधौ पौर्णमासी दीक्षितो यदग्नीषोमी
यं पशुमालभेतेति विहितइत्यर्थः॰ वचनादिति॰ सएष औपवसथ्ये हन्येव देवतः पशुरालभ्यत इत्यस्मादित्यर्थः॰
औपवसथ्यं चचतुर्थमहः॰ पूर्वपक्षे द्वादश इमादिपदेन पशुपाकरणादिग्रहणं॰ स प्रासोमयागस्तत्संबंधि पंच
ममहः सवनीयप्रकरणस्संदेहापादनाय पुनरिति॰ अनुबंध्यास्त्विति तु शब्दः साक्षात्प्रकरणादिपशुधर्मवि
निर्योजकप्रमाणाभावरूपवैषम्यद्योतकः॰ अपंचमित्रावरुणादेवयोगो द्वेष्यकःस्थानमिति॰ अनुष्ठानसादे
श्यरूपमित्यर्थः॰ नवेतीत्यनंतरं विचार्यत इत्यस्यानुषंगः॰ ततोपि॰ तदर्थमपि॰ यत्रोत्पन्नैस्तत्र प्रकरणमत
इत्यनि॰ चिंतायास्तदर्थता॰ आघपक्षमाह तत्रेति॰ आनर्थक्यात्तदंगेष्विति न्यायापादिति भावः॰ इतरत्र॰ औपव
सथ्याहे गुणार्थं॰ वपया प्रातः सवने चरंति पुरोडाशेन माध्यंदिने गैस्तृतीयसवन इति पशुयागप्रयोगवि

राम

प्रकर्षाद्द्रव्यगुणविधानार्थमद्धितापंपक्षमुख्यापपत्तिः स्यादेवमिति· ननुसौमेमहनितदुम्पतेः कथमौपवसथ्ये
प्रकरणाभिमाशं क्याहःसौमइति· यदाग्नेयपशुमुपाकरोतितदाश्विनग्रहयोन्तरमिति गुणमात्रंविधीयते· त्रिवृतेमा
धनुवादः रशनात्रैगुण्यपक्षपपरिव्याणानां वाक्यांतरेरेवप्राप्तत्वात्· गुणाभावादिति· आग्नेयःपशुरितिवाक्येगु
णश्रवणाभावात्तद्विध्यर्थमाग्नेयानुवादासंभवात· अनेनानुवादमात्रं· वाक्यांतरेण गुणविधित्वमितिभिन्नवाक्यत्वे
नायोगादाग्नेयोग्निष्टोमइत्यर्थवादानर्थक्यापत्तेश्च कर्मविधित्वंयुक्तमितिभावः येत्विति· गुरुमतानुसारिणइत्य
र्थः सूत्रे· प्रकरणविशेषादितितद्व्याख्यानभाष्यंचतुन्यः सर्वेषांपश्चविधिः स्याद्यदिप्रकरणोविशेषोनभवेत
सवनीयानांप्रकरणोपशुधर्माइमादितद्भयविरोधइत्यर्थः यद्वेति· अवांतरप्रकरणांगीकारइतिशेषः सा
धिकारेसाक्षात्फलसाधने· तत्रतैरपिपरिहारोयोवक्तव्यःसएवममापीमाशयः तमेवाह· अथेति· ननुमंत्रवर्णा
द्देवताविधिसत्वेपितद्धितचतुर्थीभ्यांतदभावादपूर्वत्वमेवेमाणकानितसायोयांश्रुपाजवदिमूकः नथाते
घ्नःपांश्रुपाजेसाधिकारेसोमधर्मातिदेशोदुर्वारःस्यादतोमात्रवर्णिकाअपिदेवतायाअसत्वमेवासकत्वंसोम
सादृश्यमतिदेशप्रयोजकमितिमाशयः दार्शेति· आग्नेयद्रव्यकत्वसाम्यादुपांशुयाजधर्माइत्यर्थः कथमंगेप्रधानाति
देशः स्वस्मिनत्स्वातिदेशापत्तेरितिशंकानिरासायपर्वेमधवदृष्टांतः स्वातिरिक्तांगातिदेशाद्वनोक्तापत्तिरितिभावः

तथापीति। स्थानादवांतरप्रकरणस्य प्राबल्यादिति भावः। आग्नेयो वः। तत्रीयं पशुप्रयाजः। एकत्रीमइति। आग्नेयः पशु
रित्यादिवाक्यस्य गुणवाक्येनैकवाक्यतामुपपादयति। आग्नेय इत्यादि। यथा वै मत्स्योऽविदितो तन्नमवधुन्वतेऽएवमे
तेऽप्रज्ञातप्रमानाजनमवधुन्वतइति संनतमु स्थाननिंदार्थवादेऽएतच्छुकापेक्षितत्समर्पणार्थमाग्नेयः पशुरिमतुवा
द। निंदोन्नीतदोषपरिहारार्थं वासवनीयपशौ प्रातःसवनिकवपायागाभ्यासादिगुणविधिरित्येकवाक्यते सर्वः
पुचारविप्रकर्षइत्यस्य विप्रकृष्टकालिकः प्रचारः प्रयोगइत्यर्थः। अतएव वार्तिके। तदिहवपाप्रचारउपादेयइत्याधुं
क्तं। सुत्यावाक्येविति। सुत्यासन्निहितसवनीयवाक्ये लिमर्थः। काल इति। आश्विनग्रहणोत्तरकाल इति। नचेति। सन्निधि
कृतप्रत्यभिज्ञायां अभावे विधेयत्वोपादेयत्वयोः सामानाधिकरण्यनियमस्य प्रकरणांतराधिकरणोक्तत्वादुपाद
नादितिभावः। शक्यतएवेति। संनिधानकृतन्यायाय्यबाधादिति भावः। प्रपंचः। अनंतरानुषेपाः। तद्वादिवेति। यस्यो
त्कर्षविधिस्तावन्मात्रस्यैवोत्कर्षइतिपूर्वपक्षे पंचमाध्यायेसिद्धांतसूत्रमिदं। तद्वादिकस्य पदार्थसंबंधस्यातिदेश।
अभिसंबंधात्तत्प्रानंतर्यरूपक्रमसंबंधादिति। वस्तुतस्तु आपवविषयतापिनेमा ह। अपूर्वत्वादेति। अक्रमक
मत्वादित्यर्थः। क्रमस्य क्रमणात्क्रमानुरोधेनोत्कर्षः। सचातिदेशिकेषु भवति। औपदेशिकवपाप्रचारस्यैवोत्कर्षमित्यर्थः
प्राचां। वपायागस्यैवं भाविनां आदिपदेन पशुपरिव्यापापत्नीसंयाजादिग्रहणं। एवं च स्वरूपपरिव्याणापशुपाकर

णापोरन्तःकर्षेणासन्निहितत्वात्तत्राग्निग्रहणोत्तरं तं न विधातुं शक्यं · यागोपि तद्धितश्रौतवाक्यभेदाच्च · न च याग एव तद्
द्धितस्तथा सत्यपि परित्यागोपाकरणापोह्लाद प्राप्तेरनुवादसंभवात् अत आह तत्राग्निग्रहणोत्तरकालं विशिष्टयागवि
धिरेव वाच्यस्तथा च सति परित्यागादेरप्यंगत्वात् प्रधानकालिकत्वेनानुवादोपपत्तिरित्यभिप्रेत्याह · तस्मादिति · इत
र · · आग्नेयवत्सस्थ्याहेष्वकूतनः · शक्नोतीति · एतेन यत्तु यागान्त्यपयोग्यतारूपं लिंगमपि दर्शितं विधेरिति · उपदेशादित्यर्थः
स्तत्रैवपि विधिरात्व उपदेशाभिप्राय इत्याह · विधिस्त्विति · उपदेश इत्यर्थः · दीक्षाकाले विधानादैन्द्र इत्यग्नीषोमीयपुरुषप
ते · प्रयोगे तन्न सामान विधेयप्राप्त्या अग्निं भरते समधिगत प्रैषगतस्य पयोव्याम प्रयोगोपयाज्ञी हितं तस्य पयप्रयोगे · सिद्धां
तेतु विकृतित्वाच्छास्यैइसततेन प्रयोग इति · सूत्रं स्पष्टार्थम् ॥ ॥ होतव्यो ॥ ॥ दर्श इति वक्तव्ये पूर्णमासग्रहणं फलं त
न्नैसाह चर्याद् दितिपेतैपं · सापयितीति · दध्यर्थ इत्यर्थः · आदिना वत्सापाकरणादिसंग्रहः · तेकिमिति · सांनाय्यपदेनात्र दधि
यागो न तु शरापोच्यते · उभयार्थाः · दधियागपयोयागोभयार्थाः · पूर्ववदिति · पयस्युत्पत्तिधर्माग्नीषोमापवादमित्यर्थः · एतेषा
यवादस्त्वसंगतिरुक्ता · यद्यपि दधियागस्य न पूर्वेद्युः करनुष्ठानं तथापि सायं दोहे न साध्यत्वेपोपरिक्रान्तिमात्रं दधि
यागस्य · धर्माणां चानुष्ठानमिसे च तत्सादेशयाभित्याशयः · अवान्तरेति त्वापाततः · · संदेशाभावेन वक्तृतत्त्वदभावा
त · प्रधानस्येति · दधियागस्येत्यर्थः · तथा चानुष्ठेयत्वेनोपस्थितिरेव क्रमः · तस्मा एवेति कर्तव्यताकांक्षारूपप्र

१२

गा·दी·

६२५

69

करणोत्पापकत्वात्· ननु यथाकथंचिदुपस्थितिमात्रमपितिभावः· केचिद्धर्माः· द्रोहादयः· प्रधानार्थत्वादिति· द्रो
हधर्माणां परेद्युराम्नानेन तत्रैव भाव्याकांक्षायां प्रकरणावशेन यागांगत्वादिति भावः· प्रयोजनं च सापाकरणादेः· पू
र्वेद्युरेवानुष्ठानं पूर्वपक्षे सिद्धांते तु परेद्युरूपामिति· अतद्‌धर्मे द्रोहधर्मैः संयुक्तं स्यात्· कुतः· द्रोहयोः कालभेदाद्धर्मा
णां च सापद्रोहकालेनुष्ठानादिति सूत्रार्थः॥ ॥तद्वत्॥ ॥उपोप्तइति· कृतपासूयवापेस्थ्यंडिन इत्यर्थः· आदिना
संमार्गादिपरिग्रहः· आतिदेशिकी संगतिरिति दर्शयति· विशेषेति· स्थानस्य प्रकरणेन बाधमभिप्रेत्याह· प्रक
रणेति· सवनांतरे प्रातःसवनातिरिक्तसवने ग्रहाम्नानमपि तत्संयुक्तं धर्मसंयुक्तमिति सूत्रार्थः· पूर्वसि
द्धांतसूत्रगतषष्ठ्यंततत्‌पदस्य प्रथमांततया विपरिणामेनान्वयात्· प्रयोजनं तु स्पष्टम्॥ ॥द
र्शनाच्च॥ ॥परिव्ययतीति· यूपं परितो वेष्टयतीत्यर्थः· ऊर्क्· अन्नमित्यर्थवादः· परिव्याणांतरमिति· आम्नायग्रह
णोत्तरकालीनत्वस्य पाठद्रुपनिष्क्रमणस्य चार्थात्प्राप्तेरनन्यपरेण विधिनाभ्यासरूपेण...द इति भावः· त्रिवृदि
ति· त्रिगुणत्वमर्थः· प्रतिष्ठानां· किंचिद्वहतानां· तत्रेति· दर्शनया परिव्ययतामनेन सान्निहितामनाबोमापपरिव्या
णो दृष्टे नैव रशनाविधानाद्‌ धर्माणां रशनाद्वारकत्वादिति भावः· एतद्रूपेति· परिव्ययतीमस्य कर्मसाकांक्षत्वेन राय
मर्थ्याम इति न्यायेन यूपमिति द्वितीयांतस्याप्युद्देश्यकोटावनुप्रवेशात् यूपस्य चोभयापूर्वसाधनत्वेन तद्धा

सोमयागतंत्रधर्माणामपि स्यादाशयः॥ नन्वग्नीषोमीयपशोः पूर्वसाधनत्वस्योद्देश्यतावच्छेदकत्वात्तदंगत्वमेव स्यादित्याशं
क्याह· नाग्नीति· लाघवात्पूर्वसाधनपूपपरित्यागे नैवोद्देश्यतावच्छेदकत्वेवानर्थक्यपरिहारादिति भावः· प्रतस
वत्त्रिवत्तेस्यप्राप्तत्वात्तत्रविधिः· अन्यथा विशिष्टविधौ गौरवापत्तेरित्यपूर्वं· प्रयोजनपूर्वपक्षेसवनीयपरित्यागोर
शनात्तद्धर्माभावः· सिद्धांतेतु तत्रापि तेषामनुष्ठानमिति· दृशनापि समानविधाना· त्रिवृत्त्वेतिलिंगदर्शनादितिसू
त्रार्थः॥ ॥आराद्दृष्टं॥ ॥स्यानस्य पूर्वैः सह विरोधाचिंतनाप्रकरणासंगतिमाशंक्याह· अतइति· नक्षेणाश
द्वोत्रपादपरः तत्संगमभिधानस्यैवतत्र तत्रदर्शनात्· साचसामान्यविषयचिंतनास्यैवेति भावः· अनंतरसंग
तिरातिदेशिकस्येवैतिस्फुटतरत्वात्रोक्ता· एते· ग्रहधर्माः· तद्धर्मीति· प्रकरणावत्तीमित्यर्थः· अन्यथासूत्रग्रहणार्थतापि
स्यादिति भावः· नन्वेवं श्वदृष्ट्यपोरपि विनियोगविधेः प्राकृरणिकत्वात्प्रकरणावर्तित्वमस्त्वित्याशंक्याह· नाना
रभ्येति· समाख्यातावत्संमत्रौ यौ ग्रहौ तद्धर्मा इत्यर्थः· उभयत्रिविधावेव धर्माकांक्षेतिप्रकरणोतद्भावात्तत्तद्रूपत्ति
तिभावः· ग्रहाणामिति· पात्राणां ग्रहणानामपेक्षमित्यर्थः· ननु सोमयागप्रकरणमेव विशेषकं स्यादित्याशंकामपा
करोति· नापानि· एतदेवव्याचष्टे· नपेइति· सोमप्रकरणांतदितिकर्तव्यताकांक्षात्मतात्तदनुष्ठानोपपठितास्तेषा
मित्यर्थः· पानाभावादिति भावः· कल्पंत्विति· सूत्रग्रहणादिवाक्यादिरित्याह· किं त्विति· प्रकरणांतराधिकाराख्यं· वि

रिति

रोषत्वादिति सोमयागापूर्वसाधनत्वेन विशेषणे सोमयागस्य तत्कोटिप्रवेशादित्यर्थः आरादनारभ्यपरिशिष्टं
श्वादिकं असंयुक्तमितरैर्धर्मैरित्यर्थः कुतः असंनिधानादिति सूत्रार्थः प्रयोजनस्यषष्ठम्॥ ॥अग्न्यंगं॥ ॥स्यषष्ठा
र्थमेतत्॥ ॥नैमित्तिकं॥ ॥अत्रापवादसंगतिः इमाविकारइति यागेसोमबाधकोननुभक्षमात्रइति पंचप
चरणोपांसाधिकरणोक्तिसिद्धांतितमित्यर्थः नद्विकारः ततोतिदेशेन धर्मग्राहकं अपूर्वसाधनत्वाराद्इत्येतद्व्या
चष्टे सोमाभिति सोमेनयजेतेत्यनेनैकवाक्यतया सोमत्वाविवक्षया चेति भावः अत्र दृष्टांतेमाहुः तेनेति
अपूर्वसाधनमात्रोद्देशेन संस्कारविधानेनेत्यर्थः निमा निमित्तविनाशभावतोविहिताः उत्तरार्धं व्याचष्टे
संस्काराहीति प्राप्तिरूपेण विधानरूपेण निमक्षाराभावात् अनुष्ठानतोपिपात्रिमंतत्तद्धारकत्वासंभवा
त् एवंसमभिषवादीनामप्यनिमफनचमसक्षारकत्वस्यादित्याशंक्य वैषम्यमाह आम्नानेति विधानरूपे
णेत्यर्थः अनुष्ठानतोऽनिमत्वस्यार्थत्वात् शाब्दबोधाविषयत्वेन तद्रूप्यदोषापादकत्वमित्यर्थः निमे
त्तस्यविवरणापावादिति नचनिमत्वस्याप्यार्थत्वात् शाब्दबोधविषयतेति वाच्यं उद्देश्यव्यापकत्वरूपस्य
तस्यासगतः संसर्गतयाभानाभ्युपगमादिति भावः शब्दतो विरोधमभिनीपदर्शयति अभिषवेणेति एक टाम
वाक्यतयाबोधेपि विरोधं दर्शयति तथेति ननु फनचमसगतानिमत्वपरिहारेणोवबोधोंगीर्यइमाशं

कृप दूषयति· पदीति· निमित्तानित्यविधानयोः कालभेदादपि न सकृदुच्चरित संस्कार विधि साम्यमित्याह॥ अपि
चेति· एतेनापूर्वसाधनत्वाविशेषात्कथं नैमित्तिकव्यावृत्तिरितिप्रयुक्तं· नैमित्तिके ऽपूर्वसाधनत्वावगमस्योत्तर
कालिकत्वेन पूर्वं तेन रूपेणाप्रापितत्तदनुपस्थितेरिति· प्रयोगान्तरं पूर्वपक्षे सोमयद्वन्मंत्रस्य फलं च यसे नोपःप्र
कृताकृताभावात्· सिद्धांते तु हुइति· सूत्रं स्पष्टार्थम्॥ ॥प्रतिनिधिः॥ ॥पूर्ववदित्यपवादसंगतिः स्वविता
विकल्पाः द्रव्यान्तरमिश्राः अत्र प्रयोगान्तरं पूर्वपक्षे व्रीहिमंत्रेऽहः सिद्धांते नेति॥ ॥नियमार्था॥ ॥आक्षेपस
माधानाभ्यां संगतिः· विंदेतन्नभेतः ऽपनक्षणात पेमनंतरं विधीयतइत्यनुषंगः॥ ॥संस्थास्तु॥ ॥अपवादसं
गतिसूचनायाह· नैमित्तिकमिति· प्रकृतोपयोगासंस्थाप्रपंचमाह· ज्योतिष्टोमस्येति· संस्था नाम यज्ञांगस्तो
त्रसमाप्तिः तत्र द्वादशस्तोत्रेषु प्रयुक्तेषु यज्ञायज्ञीयं यग्निष्टोमाख्यस्तोत्रं यत्र समाप्तौ साग्निष्टोमसंस्था· अग्निष्टोमस्तो
त्रोत्तरमुक्थ्यस्तोत्रैस्त्रिभिः समाप्तावुक्थ्यसंस्था· तदुत्तरं षोडशिस्तोत्रेण समाप्तौ षोडशिसंस्था· तदुत्तरं अतिरा
त्रस्तोत्रसमाप्तावतिरात्रसंस्थेति· संस्थान्तरारोपयिष्यन्त इत्याशंक्यते यथाम्नातभावं दर्शयति· अग्निष्टोम
स्येवेति· अग्निष्टोमस्तोत्रानन्तरमुक्थ्यस्तोत्रारोप कृत्वा षोडशिस्तोत्र करणात्तु पप्रकारान्तरमात्रं· मंत्रसवनीयप
शव्वादिकं त्वग्निष्टोमस्येवेतितद्गतमितिरिमारोपः· ननु दशमे ऽनुक्थ्याग्निष्टोमसंयोगादिसधिकरणेऽप्यग्निष्टो

१४

शा॰ दी

७१

71

मुख्यषोडश्यंतर्भावोक्तेस्तद्विरोधइत्यत आह अग्रे चेति तथा च ह्यानन्यकर्तृकप्रयोगस्य षोडशिसंस्थत्वं संस्थांतरवाधेन त
त्रोक्तेः विष्णादिकर्तृकस्यात्वग्निष्टोमसंस्थत्वानर्गतिरविरुद्धैवेति भावः वाजपेयश्चेति षोडशिस्तोत्रोत्तरं वाजपेयस्तोत्र करणोपि
वाजपेयस्य षोडशिवदेव पश्चिरिसामासानाभदंतर्भाव इति भावः अप्तोर्यामश्चेति अतिरात्रसंस्थ चतुर्थोरात्रिपर्यायः स्तो
त्रयात्मकोधिकश्चेद् स्तोर्यामसंस्थेति सातदंतर्भूतैवेति भावः पञ्चकाम इति अत्र ग्रहग्रहणं वाक्यांतरेणाप्राप्तं निवेदयि
तिवृद्ध्ये घते उक्थ्यसंस्थं क्रतुं कुर्यात् उक्थ्यसंस्थं कुर्यादितिपाव तः एवमग्निमवाक्ययोरपि स्तोत्रयागयोरनुवादः संस्था
विधिश्च फलार्थ इति बोध्यं भावार्थाधिकरणन्यायेन शंकते नन्विति ग्रहणादीत्यादिपदेन स्तोत्रयागयोः परिग्रहः मुख्य
उक्थ्यशब्देन लक्षणाप्रत्नेः संस्थाविधिरेवयुक्त इत्याह उक्थ्य त इति नसंबंधात् सच स्वपूर्वकालतारूपः ग्रहं वा गृहीत्वा
चमसं वोन्नीय स्तोत्रमुपाकरोतीतिवचनात् न चेहेति मुख्यत्वादि इतिभावः ननु समाप्तिरूपसंस्थायामपि स्तोत्रसं
बंधादुपचारस्यैवप्राशंक्या हसमाप्तेरिति नन्वस्तोत्रविशिष्टप्रयोगाद्विशेषणाभूतस्तोत्रमेवाङ्गम् अधिकरणन्यायपा
स्तोर्थं वा ह्यस्यमस्त्विति शंकते नन्विति स्तोत्रमात्रविशिष्टेक्रतौ प्रयोगाभावान्नैवमित्याह न संबंधीति स्तोत्रमा
त्रसंबंधीत्यर्थः न लक्षणाचेदिति समाप्तोर्न लक्षणा चेत्तां विना स्तोत्रवैशिष्ट्यमात्रेण प्रयोगाप्रतिरित्यर्थः तत्र तथा सति राम
वाक्यांतरेति यहं वैमादि वाक्यप्राप्तमित्यर्थः एवमिति षोडशीपत इति प्रयोगादिमत्यर्थः ननु स्तोत्रस्याप्युक्थ्या

दिशादेवाच्यत्वात्र देवफले विधीयतामत आह तत्र त्विति। स्तोत्र तत्समाख्यमपवाचित्वे सत्यर्थः। आश्रयतः पुनस्तु

पातः गुणावचनानामाश्रयतो लिंगवचनानीत्युक्तेरिति भावः। व्यवस्थायाः प्रकृतोपयोगमाह। फलवाक्ये चेति। स वैधोऽ

शीनामपत्त इत्यादिरूपो वाक्यशेषः एवमुक्त्वा दावपि तेयं। विशिष्टेति। सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयत इति

न्यायादिति भावः। विधेयस्य चेति। भावार्थाधिकरणन्यायस्यापवादमथा त्वर्थविषयत्वात्तस्यात्रापवाद इति भावः। एवमुपो

द्धातं समाप्य प्रकृतमाह। तदिहेति। वैरूप्यं। नित्यानित्यसंयोगप्रयुक्तं। उभयान्वये। नित्यकाम्योभयसंस्थान्वये। अस्तु तर्हि

काम्यसंस्थार्थमेवेष्यत इत्यत आह। नचेति। त्वपमेव। आश्रयानपेक्ष एव। एवं विशेषे सत्यपि संस्थाकांक्षावशान्नामिरप्य

न्वयमाशंक्य वैरूप्यदोषं प्रागुक्तं विवृणोति। एवमपीत्यादिना। तात्पर्यभेदात्। नित्यानित्यप्रयोगद्वयान्वयतात्पर्यभेदा

त्। कालभेदादाहृतिरूपोऽपि वाक्यभेदः स्यादित्याह। किंचेति। निर्विवादः। सामिधेनीप्रकरणस्यैव सोमस्तकारविधिभिः सं

स्थाप्रकरणस्य विच्छेदात्तासामुपदेशप्रमाणेन चर्मणाभेद इत्याह। अपंचेत्यादिना। प्रयोत्तनेपर्वपक्षेपतस्याशीटिया

दिपत्तपदेवनंद्रचस्यसंस्थापाल्लोपः सिद्धाते तु पदस्य संस्थापाध्याशीटिस्थ इति स्तुचं तत्स्पष्टार्थम्॥ ॥इति श्रीमम

द्वाक्यप्रमाणात्ततरामचंद्रसूरिवरात्मजतत्सहैघनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां तृतीयस्य अ

ष्टः पादः॥ ॥प्रकरणाविशेषात्॥ ॥संगतिमाह। समानेति। तंत्रतारूपसाधारणस्यसामान्यविध्यविशेषरूपत्वात्य

शा॰दी॰ संगइत्यर्थः विचारेण विचारद्वारेण। एवं तदेः पिंडपितृयज्ञादौ अतिप्रसंगातः वेधादिप्रसंगात् ग्राहकतयेति प्रधाने
८२ ति कर्तृव्यताकाङ्क्षया गृहीतं पदविलक्षणद्वारा वेयादिनाप्रधानापूर्वकृपादितिरीत्या विनियोजकतयेत्यर्थः ग्राहकतयेकवा
क्यत्वं प्रदर्शयन्नुपाकरोति तस्मादिति वेधाप्रधानार्थेत्यन्वयः वेधविकरणन्यायेन द्वारेणापूर्वभावनाप्रत्ययगत्व
विधानं वेति देयं किंतर्हीति तथा चत्वांगत्वापेक्षया तत्रोपकारित्वस्य लघुत्वात्तेन संबंधेन हविरादिविशेषकतयेकवा
क्यतेति भावः तद्देयाधिनं तस्मात्सादयेदिति शेषः न चेति कर्तव्यताकाङ्क्षारूपस्य प्रकरणस्याविशेषकत्वादिति तंत्रत
चोक्तेस्तस्य ग्राहकत्वमेव पुरस्कृत्य आह एवं हीति तथा च बलवद्वाक्यविरोधे विशेषकत्वमप्युक्तरीत्याभ्युपगंतव्यमि
ति भावः ननु दुर्बलस्यापि प्रकरणस्यानर्थक्यपरिहारायोपपत्त्यावश्यकत्वात् स्वारस्यभंगो न युक्त इत्यत्र [illegible] आह अथ वे
ति ननु प्रधानानंगस्य कथं तदंगद्वारत्वमित्याशंक्याह संभवतीचेति अभ्युदितेष्ट्यंगयोर्दधिपयसोः पाकांगयोर
पि तदुपकारिताभावेन प्रणीताधर्मद्वारतापान्नवमेवक्ष्यमाणत्वादिति भावः तत्कार्योपयोगितया तदंगत्वे प्रयाजादी
नामिवेति दृष्टांतः असंयुक्तं प्रकरणाविरुद्धसंयोगरहितं प्रकरणारूपत्वशेषा प्रधानस्यांगमिति सूत्रार्थः प्रयोज
नं स्पष्टं॥ ॥फलसंयोगात्स्तु॥ ॥अंगप्रधानसाधारणतायाषष्ठाध्यायसंगतिः केनेति केनाश्मक्रयते नखीनिनिकृंतते
दतो धावते इत्यादिवाक्यविहिता इत्यर्थः प्रयमानेति आत्मनेपदाल्लिंगाच्चेति भावः कर्तृ त्वरोति पुरुषस्यक

र्तृत्वमोक्षत्वाभ्यां कृतत्वप्रयोगित्वादिति भावः॥ अतः प्रकरणानुरोधात् तदङ्गानां मोक्षाङ्गभूताः संस्कारा इत्यन्वयः। दृष्ट
श्चेति। सकर्तृभावः। अन्यतः संस्कारातिरिक्तेन शरीरे घृतादिना दृष्ट इति न संस्कारापेक्ष इत्यर्थः। एतदेव विवृणोति। प्रधा
नं हीत्यादिना। प्रमाणान्तरात् आगमातिरिक्तलौकिकप्रमाणात्। यद्यपि कर्तुरपि स्नुगादिपदं पूर्वसाधनत्वयोग्यतासि
द्ध्यर्थं संस्कारापेक्षा संभवति तथापि फलजनकत्वयोग्यतातोऽप्यन्तरंगेति तद्[illegible]र्थैर्वपुक्षेमारापः। अतएव हिरण्यमा
लिनः प्रचरन्तीति बहुवचनबलात्कर्तृसंस्कारकतापि दृश्यत इति। न हीति। प्रमाणाभावादिति भावः। न त्वग्निवेकर्तृत्वा
र्थं तैर्वैसाद्दश्यात् किंचिदिति। फलाधानयोग्यताद्वाराप्रधानांगत्वमित्यर्थः। अत्र दृष्टान्तमाह। क्षेत्रेति। बीजावापेनांकुरेज
ननीये तद्योग्यतारूपोपकारेण क्षेत्रसंस्काराणामपृथग्भावीनां वपनांगत्वं तथात्रापीत्यर्थः। अनेनैव न्यायेनांगांगत्वमपि स्याद
त आह। प्रधानेति। प्रयोजनं पूर्वपक्षे पत्नीयोमीयपश्वंगत्वात् द्विकृतावृत्तिदोषः। सिद्धान्ते तु नेति। स्वामिपुत्रं वपनादि प्रधान
स्यांगं कृतः फलसंयोगात् योग्यता तेन न द्वाराप्रधानफलोपस्थत्यर्थत्वादिति सूत्रार्थः॥ ॥चिकीर्षया च॥ ॥आपवादि
कौ संगतिः। इयतीति। षड्विंशप्रक्रमादिपरिमितां वेदिं शिक्षायेत तत्राम्नातं। प्रक्रमः पादविक्षेपः इयतीति। एता[illegible]वत्स्य नाभि
कायामस्यां वेद्यामित्यर्थः। चिकीर्षेति। इच्छायांतु मनविधानादिति भावः॥ ॥तथा॥ ॥तन्निस्सपा। अनुवर्त्तिनामेकपा। त
द्विकोभिमर्शनं स्पर्शनं। पृथिवी होता। द्यौरध्वर्युः। रुद्रोग्नीत्। बृहस्पतिरुपवक्तेति चतुर्होतृ मंत्रः। अग्निर्होता। अश्विनाव

१६

शा॰ दी॰ घर्म॰ त्वष्टाग्नीत॰ मित्रउपवक्तेति पंच होतृमंत्रः॰ स्थितातत्पूर्वाधिकरणपूर्वपक्षात्॰ वचनबलादिति॰ उपदेशेनातिदेशबा
७२ धादित्यर्थः॰ ननु कर्मणोऽभिमर्शनात्वपानुपपत्तेस्तदंगहविर्लक्षणत्वेव कुतोनेष्यत इत्याह॰ हविर्मात्रस्य चेति॰ तथा च किं निषयम
भिमर्शनमित्यपेक्षायाः अभावात्वांगत्वावहृत्वर्थं वाक्यस्योचितं॰ किंतु मंत्रव्यवस्थामात्रमेवापेक्षितमिति प्रयोगलक्षणत्वे
वोचितेत्याशयः॰ किंच प्रयोगस्य कर्मणोभिन्नत्वादपि तल्लक्षणतायांलाघवं॰ अंगलक्षणतायां तु गौरवमित्यपि तेपं वक्तव्यतः पौ
73 र्णमास्यादिपदस्य कालएवमुख्यत्वात्तत्र प्रयोगलक्षणायामपीति वोध्यं॰ प्रधानहविर्लक्षणायामपि न तदंगहविर्लक्षणा किं
तु लाघवात्संबंधिहविर्लक्षणोंऽगप्रधानार्थत्वसिद्धिरित्यप्याहुः॰ सूत्रेप्रयोजनमेस्पष्टे॥ ॥दीक्षादक्षिणं॥ ॥आपवादिकी
संगतिः॰ दीक्षेति॰ विहितेति शेषः॰ कृत्स्नांगपयनियमपरिग्रहसंकल्परूपदीक्षाव्यंजकत्वेन दंडादिविधिः॰ मेखलापाद
क्षपतिकृष्णाजिनेनदीक्षयतीत्यादिसंग्रहाय आदिशब्दः॰ तस्येति॰ गौणस्येत्यर्थः॰ द्वादशाधिकरणे तद्वादशशतं॰ यजमाने
ति॰ यजमानं दीक्षयतीति द्वितीयाश्रुतेरिति भावः॰ दीक्षितेति॰ योदीक्षितो यदग्नीषोमीयं पशुमालभेतेत्यनेनेत्यर्थः॰ आ
दिनादीक्षितः सोमं क्रीणातीति क्रयपरिग्रहः॰ तथा चतच्च विशेषणाभूतदीक्षायाअपि विधौ गौरवात्तदनुवाद एव दंडेनदीक्ष
यतीत्यादिदीक्षाविधेरंगप्रधानसाधारणकर्तृसंस्कारविधित्वे तामपर्यग्राहकइत्याशयः॰ वचनादिति॰ नचत्रिदोषप राम
रिहाराच्चेतिशंक्यं॰ फलतः परिसंख्यापत्तेर्दोषाभावादिति भावः॰ प्रयोजनमग्नीषोमीयविकारेऽतिदेशानतिदेशा

रूपं सत्त्वं तस्य षार्थम्॥ ॥तथाप्रपस्य॥ ॥पूर्वोक्तवाचनिकविनियोगापवादसंगतिः प्रपमानं प्रपाख्यातिदेशापदि मासां
मानदेशमिति अप्रसस्कृतसंधिदेशमित्यर्थः विधित इति विधेयपत्वेनेत्यर्थः सिनादेवेस्यपाठनेपंचमी अर्थान्तरेतवेदि
विधिर्नास्तीत्यर्थः लक्षणापमर्थे देशपति तद्दपामिति नचार्थविहिवैदीसे तद्विधीपतां अर्थात देवसामान्यतः प्रा
प्तैववेदिरिमं तत्र्वेदी स्वनुवादोपपत्तिरितिवाच्यं मिनोतीतिसरूपप्रबलात्तदनुषंगेमानाभावेन घयोरेकवाक्य
तापास्वलक्षणापोचितपात अनुवादवैयर्थ्याच्चेत्याशपातः प्रयोजनं पूर्वपक्षेप्रपैकादशिन्यां वेदिविवृद्धिः सि
द्धांतेनेति प्रपस्य वेदिस्तथा अंगमिति सूत्रार्थः॥ ॥सामिधेनीः॥ ॥पत्नादितिनु मससप्तमीकं पत्रसन्वचि
सोमाभिषवकुर्वतीत्यर्थः ततनत्वाः सामिधेनीः अन्वाहरितस्यपर्यवसितार्थनाहः दक्षिणासिरान्निति हवि
र्धानसोमाधारठाकुटः स्पष्टमन्यत इतापीत्यातिदेशिकसंगतिसूचनं सूत्रेइतीपनंतरं वचनादिपच्चे
सा पः हविर्धानयोर्मध्ये दक्षिणसामिधेनीनामंगमित्यर्थः॥ ॥शास्त्रफलं॥ ॥प्रासंगिकीतिनुन्यः सर्वेषां पञ्चविधिपरिप्रापक्षा
नस्यपूर्वैः सह विरोधाविरोधचिंतने तत्समानविषयविचारत्वप्रसंगाद्वारा किंचिदित्यादिना वाक्यप्रकरणविरोधाविरोधचिंतयाग्र
हधर्मो गणमनारभ्याधीनग्रहसामान्यविषयचिंतातत्प्रसंगाच्चेतस्याद्दिवे धादेरंगप्रधानसाधारणपचिंतासमाप्तेत्यर्थः विचिचार
पिषु विचारयितुमिच्छुः धर्ममात्रमिति अग्रहपार्थमित्यर्थः ताभ्यां सामानाधिकरण्यात्मनेपदाभ्यां तस्मात्रैकवंच्यं शा सा

१२

शा·दी·

७४

74

ध्यसाधनेति कर्तृत्वतात्पर्यं शब्दस्य वती· पूर्वपक्षनिरासेनद्वितीयमुख्यापपत्ति· उच्यत इत्यादिना· परिक्रयेति· कर्त्रानति
·संपादने परिक्रयत्वसाधन इ ईविधायकं दक्षिणावचनमित्यर्थः सिद्धांतव्यावर्त्यनार्थमाह· सर्वश्चेति· तं परिक्रयं नियममिति·
नियमतयाप्रयोगविषयाकर्तृत्वमित्यर्थः· प्रयोक्तारित्वाग प्रधानकर्तरि फलं तल्लक्षणात्वात्· शास्त्रप्रमाणकत्वादित्यर्थः तस्मा
दित्यादिस्पष्टं· एवं प्रयोजनमपि॥ ॥तत्रार्थात्॥ ॥अन्यबाधेनोपपन्नो बहू बाधायोगात्कतीति संशयांतर्गतमेकविं
कल्पमाह· अथवेति· अध्वर्य्वादिनानासंज्ञानां कथमेकत्र समावेश इत्याशंक्याह· अध्वर्य्वादीति· तथान्येपीति· क्रम
णो वं ह्णाद्वेक्षणेन वर्द्धनाद्वृष्णात्वादिव्युत्पत्त्या ब्रह्मादयोपीत्यर्थः· तथा च चत्वार एकत्वि ग इति तत् क्रम संख्यानिमि
त्तो भाक्त एव व्यवहार इति भावः· होत्रादिशब्दानां तत्तत्कर्मनिमित्तत्वे वैदिकवाक्यशेषोपि मानमित्याह· तथा चेति·
प्रवृत्तिसमये· आवाहनाद्यनुष्ठानकाले· वरणनिमित्तत्वमिति· पूर्वं छिन्नत्वमाह पूर्वशब्दस्य छेदनादिनिमित
त्वादिति भावः· वरणैक्येन त्रिमितभिन्नसंज्ञानुपपत्तेराह· भिन्नानि चेति· कुत इत्याकांक्षायाममभ्यासादित्याह· एक
स्यैवमिति· एकस्मिन्नेव तावद्वरणानुष्ठानादनेकसंज्ञासमावेशशंकानिरासायाह· न चैकस्मिन्निति· ननु ब्रह्मभ
वेत्यादिवरणानामेव ब्रह्मत्वकीर्त्तनादुष्करणाः सतो वरणं तेन च ब्रह्मत्वममनो न्योन्याश्रय इत्याशयेन शंकते· किंपुन राम
रिति· प्रार्थनरूपेण वरणेन प्रार्थ्यमानत्वेन तत्स्यादेरन्वयाद्वरणेन ब्रह्मत्वं ननु पूर्वसिद्धत्वं तस्यापेक्षितमिति स च

पत्राह । युक्तमिति । ननु ब्राह्मणानां वरणानि इत्यत्र वरणो न ब्राह्मणत्वं भावयेदिति नोपपद्यते । वरणसंस्कारस्यैव ब्राह्मणत्वेना
भेदादित्याशयेन शंकते । किमिति । प्रागिति । वरणात्पूर्वमित्यर्थः तथात्वे हि वरणासाध्यताऽनुपपत्तिः स्यान्न त्वेवमित्यर्थः ।
पश्चाद् वरणहोतृत्वयोरभेदाद्धोतारं वृणीत इति वाक्यार्थानुपपत्तिरिति तत्राह । वरणोत्तरमित्यादि । वरणो नानतिसंक
ल्पयोर्दृष्टत्वान्न ज्ञाप्यता । तादेवं च ब्राह्मणादिशब्दनिमित्तमित्यनेनाप्यनुपपत्तिरिति । भावः । अप्रथन्नोपात्तः । आनतिरूपप्र
योगन्नोपात्तः । ननूभयविशिष्टवाचकस्यान्यतरविशिष्टे प्रयोगेन कृतार्थतापत्तिरिति शंकामपाकरोति । नहीति । नन्वानति
विशिष्टसंकल्पस्यानतिसंकल्पयोर्वा वाच्यत्वे सत्रसाधारणताया भावाद्धोरवाद्धोता वृतः सामिनीरन्वाहेत्यस्यासामंजस्या
त्वेन वरणानन्यानतिसंकल्पवाचितापक्षेऽप्यत आह । अथापीति । प्रयोगबहिर्भूतसंकल्पवारणायाह कर्तृप्रक्रम इति ।
प्रयोगकालिककर्मविशेषकर्तृत्वाध्यवसाय अध्वर्य्वादिपदप्रवृत्तिनिमित्तमित्यर्थः । वक्ष्यत इति । अत्रैव पादे कर्मका
मादिसूत्रे । वार्तिककारैरित्यर्थः । योग्यतामात्रेण । अध्यवसायमात्रेण । वरणजन्यादृष्टविशेषस्याध्वर्युत्वस्य प्रत्यक्षवरणा
भावेन सन्नेष्वसंभवात् कौशलमेव तत्राध्वर्य्वादिपदमिति प्राभाकरैः शंकते । नन्विति । तत्र । तस्मिन्पक्षे । तत्र । अध्वर्य्वादिव
रणां दूषणांतरमाह । यदि चेति । तथा च वरणजन्यादृष्टं विनापि होत्रादिपदप्रयोगाद्वरणोत्तरमपि तत्प्रयोगे व्यभिचा
रेण न वरणनिमित्तकत्वाभ्युपगमो युक्त इत्याशयः । ननु त्ववाचकशब्दैस्त्वेऽप्युपाधिनिमित्तत्वं न क्वापि दृष्टमिति शंक

ते·नन्वियंति· न दर्शानिमित्तत्वेपि तुल्यमेतदित्याह· तद्व्यर्थदेति· प्रमाणावशेन तु नामकर्तृत्वाद्दोषोपि त्रिष्टावत्स्वेष्टापा
प्रापितिनिमित्तत्वेन किंचिद्बाधकमितिभावः· मायूदिति· यौगिकत्वादितिभावः· सूत्रप्रयोजनेस्पष्टे॥ ॥चमसा॥ ॥अध
र्वर्युसंज्ञानां रूढत्वात्परस्परं वैलक्षण्यात्भेदकत्वेपिप्रकृते यौगिकत्वनिश्चयादुद्देशैकरूपत्वाच्च न भेदकत्वे सधि
कारेकपापूर्वपक्षमाह· यौगिकत्वादिति· चमसाध्वर्यवश्चमित्राः तैर्व्यत्वादिभिः सहमित्रत्वेन व्यपदेशादितिसूत्रा
र्थः· सच व्यपदेशो मध्यतःकारिणां चमसाध्वर्यवः होत्रकाणां चमसाध्वर्यव इति प्रैषे तेषां मध्यतः कारिणो होतृब्रह्मो
द्गातृयजमानाः होत्रकाः प्रशास्तृब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकाग्नीध्राः॥ ॥उपपत्तौ॥ ॥कर्तृत्वं गतपतेति· संस्कार्य
स्यपूर्वतितिनियोगानवगमस्थले विनियोगकल्पनस्यावश्यकत्वात्तत्रौपादेयत्वेनोपस्थितसंख्यापाविवक्षेतिभावः
एतदेव ग्रहं संमार्ष्टीत्यादिवैलक्षण्यतापप्रदर्शनपूर्वकमुपपादयति· नमत्रेति उक्तेन्यायमध्वर्यादिवरणविधिष्वतिदि
शतितथेति· सूत्रप्रयोजनेस्पष्टे॥ ॥दर्शनं॥ ॥स्पष्टमेतत्॥ ॥शमिता च॥ ॥संज्ञप्यमानात· हन्यमानात· तमु
रुषाइति· प्रतिप्रस्थात्रादयइत्यर्थः· शमितापशुकंठेगन्त्रीत्याध्वर्यवे समाम्नानात्समाख्यया ध्वर्यो· कर्तृत्वा राम
त्स्यान्यत्र व्यापृतत्वे इतरमनुष्यस्तेषां यतो विशेषः स्यादितिन्यायेनप्रतिप्रस्थात्रादे· कर्तृत्वमित्यर्थः॥ ॥उपगाश्च
॥ ॥चत्वारउपगायंतीतिविहितानांसंतीत्युपगाइत्यर्थः· नाध्वर्युरुपगायेदितिनिषेधः प्राप्त्यभावेनुपपन्नइत्यध्व

पुंसि ज्ञानामुपगात्वल्लिंगदर्शनादितिसूत्रार्थः॥ ॥विक्रूपी॥ ॥स्पष्टार्थमेतत्॥ ॥कर्मकार्यात्॥ ॥गुरुमतेन सिद्धां
तमाह॥ वरलांतन्निमित्तमिति॥ वचनमिति॥ समुदशब्दितइतीत्यर्थः॥ इताः समुदशौ वक्ष्यर्थिनइत्यर्थोपपन्नेः सन्मतेतु ज्ञात
पुत्रनकर्मा॥ समुदशौ वेत्यर्थानुपपत्तिः॥ चमसाध्वर्युणामपितथात्वेन समुदशाबालं भवादित्यर्थः॥ अतिप्रसंगइ
ति॥ तथाचवताः समुदशौ वेत्यर्थानुपपत्तिस्त्वन्मतेपि तुल्येत्यर्थः॥ नकिंचिदिति॥ प्रमाणासिद्धमितिशेषः॥ विशेषएवे
ति॥ ब्रह्मादिगततत्वद्दृष्टव्यक्तिरेवेत्यर्थः॥ तथाचाक्षादिपदवत्॥ नानार्थत्वाविकृतादइत्यर्थः॥ यद्यपि ब्रह्माद्यन्यत
मगतत्वेनानुगमः संभवतितथापि गौरवान्नदुपेक्षितेतिपं॥ कथंतर्हि भाष्येसामान्यराद्दस्योक्तिरित्यतआह॥ योप
मिति॥ तथाचैकमावावाचकस्वरूपंसाधारणशब्दत्वंसामान्यराद्वस्यमभिप्रेतमितिभावः॥ तदिदंदूषयति॥ नत्वेत
दिति॥ रात्र्यंतट॥ रूढिः॥ निपातनादिति॥ कविकृदधिगिमादिसूत्रेतोमर्थः॥ गमेर्डें इमादिवद्वहुमतिमात्रार्थतामात्रं
क्याह॥ कर्त्रैरीति॥ धर्मस्मृतिविशेषमप्याह॥ आलिंगिति॥ इतिहरीति॥ हटतेइतिनाथपोः॥ परातिमन्त्रशासनादि
तिभावः॥ ऋतिश्चेति॥ समुदशेत्यादिके त्यर्थः॥ योगरूढत्वोपपादितेत्यर्थः॥ प्रकारांतरेण॥ अध्यवसायेन॥ विशेषे
ति॥ ब्रह्मादिगतस्वरूपेत्यर्थः॥ प्रयोजनेपूर्वपक्षे हिरण्यमानिनक्रानिजः॥ प्रचरंतीत्यादिधर्मांश्च मसाध्वर्यूणामपि
सिद्धांतेनेति॥ ॥नियमस्तु॥ ॥स्वामिसमुदशाः॥ ॥रूपमप्यतिस्पष्टार्थं ब्रहष्टार्थमिति॥ सदस्यकर्तृत्वप

दार्थाश्च वराग्रस्नक्रुवद्धिनियोगमगेनस्नदस्य वरत्वामदृष्टार्थे विक्षीपत इति भावः॥ ॥तेसर्वार्थाः॥ ॥उपोद्धात्मतपा
विचारस्य संगतिः तस्योपदेशेसाधनस्य सूत्रं उपदेशो वचनं मैत्रावरुणः प्रेष्यतीत्यादि समाख्यानं विशेषरूपं तेन तस्य
कर्मतो निर्देश इत्यर्थः योत्रापि विस्मादौ पूर्वपक्षात् तो वीतमाह तदिदमिति तत्संयोगात्कर्मतो व्यवस्था स्यादिति सू
त्रस्य शेषभूतमित्यर्थः उच्यत इति तद्धत्व लिंगदर्शनमित्यग्निमत्सूत्रे इत्यर्थः हौत्रसमाख्याते प्रातरनुवाके होतुः प्रा
तरनुवाकमनुब्रुवत इति होतुः प्रासस्य दर्शनं समाख्याविनियोगे लिंगमित्यर्थः॥ ॥प्रैषानुवचनं॥ ॥प्रसंगसंगतिं द
र्शयति उपदेशादिति प्रैषाः अग्नये समिध्यमानायानुब्रूहीत्यादयः प्रैषमनुच्यमानान्यनुवचनानि प्रवो वाजा अभि
द्यव इत्यादीनि कानिचित् प्रैषस्य समनुवचनानि होतापक्षद्विमादीनि अत्र हि होतर्यजेत्यंशे प्रैषरूपता प्रेष्येत्य
ध्वर्युप्रैषानंतर्याच्चानुवचनत्वमपीति ननु प्रैषाणामनुवचनानामपि वार्त्तिके हौत्र एव पाठः केनहमपत्रापि पाठेवा
विकल्पेनोभयनिवेशोपपत्तेस्तत्प्रच्युतेरसंभव इत्यस्य रसादाह तदधिकारे चेति प्रैषाणामनुवचनरूपपुरोनुवाक्या
धिकारे चेत्यर्थः एवं चाधिकारादेवोद्देश्यविशेषान्वयसिद्धेर्वाक्यभेदपरिहारेणापि सिद्धांतसिद्धिरित्यर्थः सूत्रं प्रयो
तने स्पष्टे॥ ॥चमसाध्वर्यवः॥ ॥प्रसंगसंगत्याह चमसैश्चेति चमसहोमीत्यर्थः संशयः अध्वर्युकर्तृकत्वं चम साध
साध्वर्युकर्तृकत्वसंशयः अतद्गुणत्वादिति अयमर्थः चमसाध्वर्युपदं स्निन्नरूढं किंतु यौगिकमेव तत्र चाध्वर्युपदं

स्य मुख्याध्वर्युर्वाच कस्यात्र गौणत्वं तत्साद्गुण्यात् तत्र मन्त्रहोमकर्तृत्वेनैव मुख्याध्वर्योरन्यत्र व्यापृतत्वे बोध्यत इति अ-
ध्वर्योस्तत्राकर्तृत्वे तु साद्गुण्याभावात् गौणत्वं च मन्त्राध्वर्युपदप्रयोगानुपपत्तिनाध्वर्यवसमाख्यायाश्च मन्त्रहोमेषु बाध इति
सूत्रप्रयोजनं स्पष्टं ॥ ॥वेदोपदेशात्॥ ॥औद्गात्रे सामवेदे आध्वर्यवे तत्समाख्याते काण्डे प्रधानविधिविधेयत्वादिति
समाख्यायाः कर्तृप्रापकत्वात् कर्तृश्च [illegible] सांगप्रधानप्रयोगविधानद्वारा प्रयोगस्य चैकत्वात् प्रधानकर्तैव समाख्यान-
र्थः सर्वत्रौपदेशिकत्वपातिदेशिकापवबलत्वमर्थः अपेक्षाणि बंधनेति अपेक्षाणि बंधनात् क्लृप्तिकल्पनापत्त्या इति
विग्रहः अपि चेति अध्वर्यवसमाख्याते काण्डे पठितत्वमाध्वर्यवत्वं तन्तुततत्तद्विधिविधेयत्वमिति भावः । वेदोपदेशा-
प्रधानवेदविधानादेवान्यत्र प्रकृतौ समयविपर्ययोपदेशमेव परं वर्ण्यप्रकृतौ विवक्षित इति सूत्रार्थः ॥ ॥इति श्रीमन्मद-
वाक्यप्रमाणमितश्रीमत्सज्जनमयदबुधात्मजनन्दसदैवनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां तृतीय-
स्य सप्तमस्याष्टमः ॥ ॥स्वामिकर्म॥ ॥समाख्यापवादसंगतिः पूर्वपक्षः अविगानतिसंपादने अन्वाहार्यश्च
तः सः पूर्वपक्षः अध्वर्यादेर्व्यापृतत्वेन प्रवृत्तस्य च द्रव्यव्ययानुपपत्तिमाशंक्याह यथा चेति समाख्यामात्रेणाध्वर्यसा-
वगतसाक्षात्कर्तृत्ववाधे वाधकमाह नहि पइति यमब्रवीत्पुत्रोत्पादयेति यः काममयेत स च नहोत मन्त्रेणाजुहुयादि-
त्यर्थः परकार्यप्रवृत्तस्याध्वर्योः स्वगतफलार्थं पराग्निषु होमासामर्थ्यादिति भावः तस्मात्पूर्वपक्षवशेनैव कर्तृत्वप्राप्ति

र्थामस्त्विरूपातिरिक्तिः एवेत्याह· अत इति· प्राप्नुवंतीतिशास्त्रं तं· एवं च समाख्यायामपि विधिना यवमित्याह· नियममात्रमि
ति· परिक्रयस्य नियमविधित्वाद्यवादपि यजमानकर्तृकत्वमित्याह· किं चेति· वरान· दृष्टान· परिक्रय· स्वामिन एव कर्म· क
र्तृत्वोपजमानार्थं त्वादितिसूत्रार्थः॥ ॥संस्कारात्तु॥ ॥समाख्यानादिति· आध्वर्यवसमाख्यावशात्कर्तृसंस्कारत्वमुचितमिति
मित्येवं प्राप्ते संस्कारत्वं समाक्षिप्य पूर्वपक्ष इति भावः· अथवात्र यजमानसंस्कारत्वे स्थिते सति फलसंयोगादि स्वत्र कर्तृत्वमा
क्तत्वां ताविचार इत्यर्थः तत्र तस्य सर्वं संबोध्यम संस्कारा इति· कार्ययोग्यता· फलोत्पत्तियोग्यता· ननु क्रत्विजामपि क
र्मकर्तृत्वयोग्यताजननार्थं संस्काराः स्युरित्याशंक्याह· न चेति· स्वयमेवेति· फलोत्पत्तियोग्यताजनकसंस्कारस्याधिका
रित्वांतरे एवोपयोगस्योक्तत्वाद्यजमानस्यैव तद्योग्य इति भावः· किमर्थं तर्हि परिक्रयस्तत्राह· स्वतश्चेति· स्वार्थमित्यर्थः· एवं च
कर्तृसंस्कारकत्वेपि समाख्याप्रवृत्तसंभावाद्यागानुमानत्वमेवेत्याह· संस्काराश्चेति· तेषु गुरुत्वाभावेन समाख्यया कर्तृत्वा
प्राप्तेरिति भावः· वचनादिति· कर्तृत्वांशेनोपयोगं कल्पयितव्येति भावः· न च स्वामिसंस्कार एव नापि तवदध्वर्युकर्तृकत्वा
पत्तिरिति वाच्यं· आचारविरोधात्मनेपदानुपपत्तेश्चेतिध्येयं· संस्काराः पुरुषरूपेसाध्ये संस्कार्ये यथा वेदे यथासमाख्या
कर्मवदध्वर्यादिव्यवस्थिता भवंतीति सूत्रार्थः॥ ॥तपश्च॥ ॥दुःखात्मकत्वादिति· दुःखजनकत्वादित्यर्थः· अ याम
स्य· तपसः· दुःखफलमिति बहुव्रीहिः· कार्यविरोधितं· फलप्रतिबंधकं· योग्यतेति· फलनाश्यत्वाद धर्मस्येति भावः·

वचनादिति· तत्रागमाश्रातदुपकारकत्वं कल्प्यत इति भावः· तपश्चफलसिद्धिं वा मन्नसाधकत्वाल्लोकवत्संस्कारइ
तिसूत्रार्थः॥ ॥गुणत्वाच्च॥ ॥स्पष्टार्थमिदं॥ ॥सदः सन्नोमंदयत्तस्यमानं प्रमातात तत्रैवमर्थः तया· परस्मैपदरूपया· वाक्य
गतस्यकामयतेस्त सामानाधिकरण्यं अधपुंव्यापारसामानाधिकरण्यं बाध्यत इत्यन्वयः· ननु योहृष्टिकामः स सोम
रेणाहत्वीते माक्षेपरस्मैपदाभावाद्विलिंगाद्विना स्यादत आह· किं चेति· नामिदघ्रः· नापिप्रमाणः· सयजमानस्तेनकाम
गुणेन निमस्यनामिदघ्रता व्यगुणात्स्यवाधमनुमन्यत इत्यर्थः· कुतस्तत्राह· नहीति· तस्य· यजमानस्य· वैयधिकरण्या
दितिभावः· आत्मनइतियजमानविशेषणं स्यादत आह· वाशब्दश्चेति· ननुयजमानप्रयोगस्यवैगुण्यापत्तिरितिमा
शंक्याह· वचनस्येति· प्रतिभारोन्यायविरोधस्तदभावादित्यर्थः· नत्रवचनबलादेवावैगुण्योपपत्तेरितिभावः· का
म्योपितथा नसमाख्यया व्यवस्थितः· अर्थसंयोगात· प्रार्थतो यजमानसंयोगादिति सूत्रार्थः· प्रयोजनं यजमानका
मनाभावे गुणाकामानुष्ठानं॥ ॥मंत्राश्च॥ प्रमत्ताशिष इति· स्वगतफलाशंसनप्रकाशका इत्यर्थः· प्रमकृत्याद
स्यात्स्म सम्भवाप विषयार्थकत्वात्· अकर्त्रर्थत्वेति· कर्तृसंबंधिप्रकाशने नहि कर्त्रर्थत्वं तदसंबंधिप्रकाशनेतुतत्र
स्यादित्यर्थः॥ ॥द्व्याम्नानेषु॥ ॥पूर्वोक्तैककर्तृकत्वापवादात्संगतिः· नचेति· सिद्धरूपत्वेनेति कर्तव्यता त्वाभावात्तदा
कांक्षास्वरूपप्रकरणाविषयत्वादितिभावः· यावेति· उच्चारणेत्यर्थः· नतु कर्तं नावां नरक्रियायोगादहते वाक्योपकल्पितातग

ताद्रूप्ये कर्त्रभावे धर्मिलाति प्रकृताः क्रिया इति· मंत्रस्याप्युच्चारणापेक्षामाह· आपेक्षितश्चेति· ननु स्मृतिरेवोपायोऽस्त्विस्यत
आह· तत्रेति· अत एव· उपस्थितोच्चारणोपायानिपमाद्वि· भिन्नविषयत्वेनेति· भिन्नोच्चारणादिविषयत्वेनेत्यर्थः· उच्चारणा-
नरप्रयोजनं तु स्तुत्युपस्थापनादिक्रियाप्रयोगविवक्षणे यजमाने नेति दृष्टरूपमेवेत्याशयः· सूत्रप्रयोजनेस्पष्टे॥ ॥तृतीये च॥
कृपाति· आप्लुप्यते न कल्पतामित्यादिमंत्रानित्यर्थः· अविरोधादिति· ज्ञानरूपो हि प्रयोगविधिवाचनसंभवादित्यर्थः· तेवा-
चनस्यादृष्टार्थतापत्तेराह· पद्धेति· तेवाचनस्यादृष्टार्थतां वारयति· ब्रूहीतीति· इमं मंत्रं ब्रूहीत्यर्थं वाक्येन यजमा-
नस्य स्मारणादित्यर्थः॥ ॥याजमाने॥ ॥वसमिति· धेनुसमीपगमनाय मंत्रं चमसमित्यर्थः· उत्थाम मात्रं· दृष्टतासं-
पादनपदार्थमाह· दृष्टोस्तिति· धेनुवत्साद्योरित्यर्थः· नन्वस्य गुणस्य क्रियाकर्तृभिन्नेनानुष्ठातुमशक्यत्वात्क्रिया-
याश्च धर्मं च त्वाद्गुणस्यापि तथात्वापत्तिरिति याजमानविशेषसमाख्यानिर्विषयास्यादत आह· कर्मणाय
पिया जमानानिस्यादिति शंकां निरस्यति· न चेति· दृष्टतां कुर्वीतिस्मारकतया याजमानत्वोपपत्तेरिति भावः· साक्षा-
त्वे त्कर्तृत्वेन गुणाविरोधन्यायेनाधर्मविनतु याजमानस्येत्याशयः· वचनेनोक्तन्यायबाधं शङ्कते· नन्विति· आत्म- दाम
नेपदस्समानकर्तृकत्वात· आत्मनेपदार्थक्रियाफलस्य मानकर्तृकत्वात· सूत्रे याजमानमितिक्रियाविशेषणाभि-
प्रायकत्वत्वनोपपत्तेः॥ ॥प्रवृत्तिनिषेधे॥ ॥पूर्वोत्तराधर्मेतत्वस्य करणं मंत्रेयवादाससंगतिः· युगपदिति· प्रयाप्य

तीयप्रमाणायानुब्रूहीतिप्रैषानंतरपाठात्करणमंत्रः प्रैषवशाद्धक्तिपमाणानुवादी एकस्मिन्नेवकालेपठिता
विप्रर्थः परिवीरसिपरित्वादेवीर्विशोप्यपंताम्मिमादिः करणमंत्रः इतरः क्षिपमाणानुवादी चोदकेति प्रीतिषो
मातस्तत्रात्मके द्वादशाहेततोगवामयनेततः कुंडपायिनामयनइत्यतिदेशपरंपरयेत्यर्थः समासः संक्षेपः
होत्रं अनुवादमंत्रं आधुर्यवं करणमंत्रं अग्निपमइति वरणानिमित्तहोत्रादिशब्दानांसत्रेवरणाभावेन
मुख्यार्थवाधाल्लक्षणायामपकर्मानुवादेनैकस्यकर्तृविधानाद्धनाबुन्नकृतविशषाभावादितिभावः ननु
होत्रादिशब्दानामध्यवसायविशेषनिमित्तस्योक्तत्वात्सत्रेपिहोत्रादित्वेनकेवलंसामानाधिकरण्यानु
पपत्त्यातद्यन्याधर्युपदंलिक्षितांधर्युकर्मैवहोतारमुद्दिश्यविधेयंस्यादित्यत्रेमेवपक्षमाह अथवेति
अधर्युत्वं तत्कार्यं परिधिरिवेति परिधौपरत्वेनिर्पुत्तोतितिपूपकार्येपरत्वेवधनेपरिधिः स्वधर्मसत्वक्ता
धविशेषेनप्रवर्त्ततेनतुतल्लक्षणादितत्रक्तिपतेतथात्रेमर्थः पघापिदार्शीतिकेहोतर्युद्देश्यत्वं दृष्टांतेप
रिधौविधेयत्वमितिवैषम्यं तथाप्यतिदेशतोप्रवधमधिधौपरिधेरप्युद्देश्यत्वमितिसाम्यमहनोपं
मुख्यत्वादिति अनेनस्तोत्रशब्दलक्षितेहोत्रकार्येधर्युविधानमितिपक्षस्यनिरासः सूचितः होतृदृ
शेनाधर्युकर्मविधानेत्वधर्युकर्मणः प्रकृतौप्रधानस्यात्रहोमसंस्कारकर्मत्वमप्राकृतंप्रसज्येतेति

शा॰दी॰ भावः परिधिविदृषां तत्रैव सम्यगाह परिधाविति पुरोडाशप्रयुक्तकपालस्यानुयोपदापइवाग्निपरिधानप्रयुक्तस्यैव यप
रिधेर्विनियोगास्य धर्मविशिष्टस्य न च प्रयोजनत्वात् तत्कल्पाहिस्यादिधर्मविरोधेन प्रयकार्यकारितापुक्ता॰ होतृस्थानपवसा
यनिमित्तहोतृत्वेनैवाध्वर्यवविनियोगात्स्वकार्यप्रयुक्तिरिति वैषम्यानिमाशयः॰ गुरवस्तु सत्रे मुख्यहोत्राद्यभावाद्धौ
त्राध्वर्यवयोर्हौत्रादिपदलक्षितयोरेककर्तृविधिरेवं वाक्यार्थः॰ अंतरंगतयाकुरणामंत्रेणेतरबाधात्स्वसिद्धांतइतिवदं
तितन्मतमनूद्य दूषयति॰ प्रास्वति॰ सत्रे प्रमाणमाह॰ वक्ष्यतिहोति॰ इपपूर्वकेणाधानुनाऽयेपुरिमेनेनचोदनादिमेष
मेव वक्ष्यतीमयं॰ पुक्तिविरोधमप्याह॰ किं चेति॰ वनीपस्त्वमिति॰ नचांतरंगतयाध्वर्यवस्य बलवत्वेनकर्तृतापं॰ द्वयोरपिऋ
पाप्रकाशकतयासाम्यात्॰ तदापग्रंथविरोधमप्याह॰ प्रमक्षेति॰ सूत्रार्थस्तु॰ विप्रतिषेधेविरोधेकरणमंत्रस्यैवप्रयोगः॰
समवायेन्चयेविरोधादुपदेशात्स्वरूपात्॰ इतरमंत्रैर्हौत्रादीनामन्यः पुरुषोवदेत्॰ कोसौतत्राहपत्नीपस्मिन्नविरो
धः प्रमासन्निरूपः स्यादिति॰॥ ॥प्रैषेषु॥ ॥प्रासंगिकीसंगतिः॰ अग्नादितिसंबोधनं॰ प्रेषितः॰ प्रैषप्रयोक्तुः॰ तदर्थानां॰
प्रैषार्थानांसूत्रेतु इतरमन्यइमनुवक्ष्यप्रैषेषु चेतरं प्रैषार्थमन्यः कुर्यात्॰ परस्मिन्॰ पुरुषेप्रैषमध्यमपुरुषयोगवि
कारात्प्रयोगादितिव्याख्येयं॰॥ ॥अर्थपुक्तु॥ ॥स्पष्टमेतत्॰॥ ॥ऋत्विक्फलं॥ ॥करणोतिममाग्नेवर्चोवि ताप
हवेष्वस्त्वितिपूर्वमग्निंगृह्णातीत्यस्याधानादौकरणत्वेनविहितादस्मदर्थः॰ नचेति॰ मंत्रस्यांगत्वादंगगुणविरो

येच प्रधानगुणस्यवत्नीयस्त्वादिमर्थः वर्चस्ते नोविशेषः आत्मनेपदं विधिश्च तेरूपलक्षणांवोध्यं अग्निहोत्रं जुहुया
८ दित्यां वात्मनेपदाभावेनाव्यापकत्वात्। एतदुत्तरं सूत्र द्वयं स्पष्टार्थम्॥ ॥द्रव्यसंस्काराः॥ ॥प्रयाजशेषोपूपनिरवपनार्थो
गत्रेः विकृता वपूर्वस्यपूयावदक्षरणस्यनिर्देशाद्वार्हिर्धर्मीणामनधिकारोननुष्ठानमिति सिद्धितायस्तत्रार्थः॥ ॥विरोधे
च॥ ॥पूर्ववत्साधारणापवादाद्वातिदेशिकोसंगतिः धर्मवदिति समंत्रकलवनादिसंस्कारवदिमर्थः संनद्धस्यवद्धस्य
स्मरणाइति वर्हिस्तरणमातिवचनेनेमर्थः असंस्कृतादेवेति अमंत्रकलवनमात्रविशिष्टाद्वर्हिषः परिभोजनीयाख्यादि
मर्थः स्तरणविनियोजकश्रुतिविशेषात्तेनवर्हिषापवित्रकरणोविरोधादव्यक्तः समावप्राप्ति त्रन्नोदर्भाविति विधानात्
पवित्रार्थः सामान्यविधिः शेषपरिभोजनीयेवर्हिषि तुपइतिसूत्रार्थः॥ ॥अपनयः॥ ॥विनियोगासंभवादिति
विनियुक्तविनियोगायोगात् कृत्प्रतिपत्तरवाधायनेश्वेति भावः पयस्येति आमिक्षांमैत्रावरुणपात्रे प्रास्यतिर्घाना
आश्विनपात्रइतिविहितामिक्षादिविषयामर्थः एकदेशेति एकदेशद्रव्ये चोपनीतो विद्यमानसंयोगादितिचातुर्थिकन्या
येनोत्तरार्धादिवदेकदेशवाचितयासंनिहितविद्यमानावयविसंवंधित्वावगमेन द्रव्यांतरप्रयोजकत्वसिद्धेरित्यर्थः श्रु
तप्रतिपत्तिवाधस्त्वपदेशावगतप्रतिपत्त्यंतरेणयुक्त एवेतिभावः॥ ॥विकृतौ॥ ॥पत्नेति पत्नीरूपमापर्वणां अभि
चारकर्मसहृदणमिमर्थः कर्त्तव्यत्वनिर्देशादिति तव्यप्रत्ययेनकाम्येष्टिकर्मकभावनाप्रतीतेस्तत्र च फलकर्मकभा

रा·दी· वनेतिकर्त्तव्यतायाअनंतर्भावादित्यर्थः॥ ॥सन्निधान॥ ॥प्रधानार्थसापवादसंगतिः इतिश्चर्मः स्पष्टमन्यत॥ ॥
तत्कालेनेवा॥ ॥सामान्यतोगाव तारेसिद्धे तद्विशेषचिंतनाप्रसंगसंगतिरितिसूचयितुमाहस्थितमिति· सामान्यतो इ
ष्टादिति· अनुमानात्· सामान्यतः प्रधानप्रमाणसन्त्रवदर्शनादितिवार्थः॥ समाकालानां इतिनवनीतस्यादि समनुषंगः
अनुग्रह वचनेनेति· अग्नीषोमीयस्यपश्वालंभेऽग्नीषोमीयः पुरोडाशः· अनुवंध्यायाश्चानेमैत्रावरुण्यापयस्येति वाक्याभ्या
मित्यर्थः· तद्वत· परस्याहिस्पवत· अत्रैवंप्रयोगः॥ इतिनवनीतस्य समाकालं· स्येनविशेषविहितांगत्वात· परस्यादिसव
दिति· सिद्धांतमाह· मैवमिति· अनुमानेनेति· आगमविरुद्धस्यानुमानस्यप्रामाण्याभावात· धर्मविषये प्रामाण्यस्यविशे
षतस्तर्कपादेएवनिरस्तत्वेति भावः· अप्रयोजकत्वमप्याह· अप्रयोजकश्चेति· स्तहेतुत्वात्· प्रधानप्रमाणसन्निमात्रेणाव
स्याव गतसर्वांगार्थत्ववाधायोगाच्चेति भावः· पशुसाहित्यस्यसमाकालिकत्वेतुनैवंविधवाक्यवाध इतिवैषम्यं
॥ ॥मांसंतु॥ ॥अत्रसमाकालानांगमात्रसंबंधाभिधानादपवादसंगतिः· तत्संमांसंतन्मपाइत्यर्थः· सवनीयानां
मिति· सवनीयपशुविषामिमत्यर्थः· स्थानइतिचशेषः· अवयुसपृथक्त्व· एकदेशानुवादइत्यर्थः· सवनीयपशोद्स्यसव नप
नीयपुरोडाशमात्रानुवादत्वे वहुवचनस्यसवनीयाः पुरोडाशा इतिसामानाधिकरण्यस्यचानुपपत्तेराह· प्राणाम

शा· दी·

दिति· सप्तदशवदिमपपाठएव· तस्यक्रमोदाहरणत्वात्· नक्षत्रेष्टिक्रममित्यत्रागोरायेवोक्ता अघन्यवृत्तिरवस
म्यात· इष्टेति· पुरोडाशानन्तरं कुर्वित्यत्र सवनीयपश्वर्मा त्रयाणां करणप्रकाशनादिति भावः· सवनीयस्य· सवनीय
पशुस्य अवदानत्वाविति· उद्देश्यविधेययोरव्यवधानमानन्तर्यमिति अर्थः· तद्युक्तं सवनीयपश्वव्यवहितः· उक्तसिद्धांते
स्तोके नसंगच्छतीति· सवनीयेति· तरसमितिपूर्वार्धान्वितमध्यमस्तिन्यायेनोत्तरत्रापि संबध्यते· विकरोति· बाधते
अध्यायार्थश्लोके नोपसंहरति· उक्तइति· हेतुः पदार्थस्वरूपः अत एव तदुत्तरं· अत्र क्रमादौ विशेषे परंपरं मानं पू
र्वस्माद्दुर्बलं स्यादिति· उक्तमिति लिंगविपरिणामेनानुषज्यते· अत्रास्तीति· विरोधः क्वास्ति क्व नास्तीति चोक्तमि
त्यन्वयः· एवं प्रकारेणाशेषकथाशेषनिरूपणमिति अर्थः· मांसं सवनीयानामंगं· चोदनायाः अविशेषात्· पुरोडा
शानेनोद्देश्यसवनीयविशेषणायोगादिति सूत्रार्थः॥ ॥इति श्रीमत्सदेवाख्यप्रमाणात्तु श्रीमत्सद्[illegible]चंद्र
सूरिवरात्मजतनयसद्धेघनाथकृतायां शास्त्रदीपिकाव्याख्यायां नवमोध्यायः संपूर्णः॥ ॥श्रीरामचंद्र॥ ॥ २२५